# ॥ ઉત્તર ગીતા ભાષ્ય ॥

.. Uttara Gita Bhashya ..

sanskritdocuments.org

September 11, 2017

# .. Uttara Gita Bhashya ..

# ॥ ઉત્તર ગીતા ભાષ્ય ॥

## Sanskrit Document Information

Text title : Uttara-Gita

File name : uttaragiitaa-bhaashya.itx

Category : gItA, giitaa, svara, vyAsa

Location : doc_giitaa

Author : Vyasa (?)

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi, Domenico Salvati salvati-domenico at alice.it

Description-comments : Mahabharata (?)

Latest update : May 21, 2008, February 22, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

॥ ઉત્તરગીતા ॥

શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય શ્રીમદ્ગૌડપાદાચાર્યૈઃ
વિરચિતયા વ્યાખ્યયા સમેતા સંભૂષિતા ॥

અખણ્ડં સચ્ચિદાનન્દમવાઙ્મનસગોચરમ્ ।
આત્માનમખિલાધારમાશ્રયેઽભીષ્ટસિદ્ધયે ॥

ઇહ ખલુ ભગવાનર્જુનઃ ધર્મક્ષેત્રે કુરુક્ષેત્રે ભગવદુપદિષ્ટમાત્મતત્ત્વોપદેશં વિષયભોગપ્રાવણ્યેન વિસ્મૃત્ય પુનસ્તદેવાત્મતત્ત્વં જ્ઞાતું ભગવન્તં પૃચ્છતિ—

અર્જુન ઉવાચ —

યદેકં નિષ્કલં બ્રહ્મ વ્યોમાતીતં નિરઞ્જનમ્ ।
અપ્રતર્ક્યમવિજ્ઞેયં વિનાશોત્પત્તિવર્જિતમ્ ॥ ૧॥

કારણં યોગનિર્મુક્તં હેતુસાધનવર્જિતમ્ ।
હૃદયામ્બુજમધ્યસ્થં જ્ઞાનજ્ઞેયસ્વરૂપકમ્ ॥ ૨॥

તત્ક્ષણાદેવ મુચ્યેત યજ્જ્ઞાનાદ્બ્રૂહિ કેશવ ।

હે કેશવ યજ્જ્ઞાનાત્ યસ્ય બ્રહ્મણઃ સમ્યગ્જ્ઞાનાત્
તત્ક્ષણાદેવ જ્ઞાનોત્તરક્ષણાદેવ મુચ્યેત
અવિદ્યાનિવૃત્તિદ્વારા
આનન્દાવાપ્તિર્ભવેત્, તત્ બ્રહ્મ બ્રૂહિ
સ્વરૂપતટસ્થલક્ષણાભ્યાં
પ્રતિપાદય ઇત્યર્થઃ । એતદેવ લક્ષણૈર્દર્શયતિ—
યદિત્યાદિના ।
એકં સજાતીયવિજાતીયસ્વગતભેદરહિતમ્, નિષ્કલં
અવયવરહિતમ્, વ્યોમાતીતમ્,
આકાશાદિચતુર્વિંશતિતત્ત્વાતીતમ્,
નિરઞ્જનમ્ સ્વયંપ્રકાશમ્, અપ્રતર્ક્યમ્,
અમનોગોચરમ્—
'યન્મનસા ન મનુતે' ઇતિ શ્રુતેઃ, અવિજ્ઞેયં
પ્રમાણાવિષયમ્—

’યદ્વાચાનિરુક્તમ્’ ’યતો વાચો નિવર્તન્તે’
ઇતિ શ્રુતેઃ,
વિનાશોત્પત્તિવર્જિતં ત્રૈકાલિકરૂપમ્, કારણં
સર્વોત્પત્તિનિમિત્તોપાદાન-
રૂપમ્, યોગનિર્મુક્તં વસ્ત્વન્તરસંબન્ધરહિતમ્,
હેતુસાધનવર્જિતં નિમિત્તત્વોપાદનત્વધર્માદિવર્જિતં
ઇત્યર્થઃ, સ્વસ્ય સનાતનત્વેન તાભ્યામેવ વર્જિતમિતિ વા,
હૃદયામ્બુજમધ્યસ્થં સર્વલોકાન્તર્નિયામકતયા
સર્વલોકહૃદય-
કમલમધ્યસ્થમ્, જ્ઞાનજ્ઞેયસ્વરૂપકં જ્ઞાનં
સ્વવિષયપ્રકાશઃ
જ્ઞેયં વિષયઃ તદુભયસ્વરૂપં તદુભયસત્તાત્મકમ્,
યત્ બ્રહ્મ, તત્ કીદૃશમિતિ પ્રશ્નાર્થઃ ॥

એવમર્જુનેન પૃષ્ટો ભગવાન્
પ્રશ્નાર્થમભિનન્દન્ ઉત્તરમાહ—

શ્રીભગવાનુવાચ —

સાધુ પૃષ્ટં મહાબાહો બુદ્ધિમાનસિ પાણ્ડવ ॥ ૩॥

યન્માં પૃચ્છસિ તત્ત્વાર્થમશેષં પ્રવદામ્યહમ્ ।

હે મહાબાહો ઇતિ સમ્બોધયન્
સર્વશત્રુનિબર્હણસામર્થ્યં
દ્યોતયતિ । શત્રવો રાગાદયશ્ચ । હે પાણ્ડવેતિ સત્કુલપ્રસૂતિં
દ્યોતયતિ । બુદ્ધિમાનસીતિ સ્તુવન્
સ્વોક્તાર્થગ્રહણાવધારણસામર્થ્યં
દ્યોતયતિ ।ત્વં માં પ્રતિ યદાત્મતત્ત્વં પૃચ્છસિ, તદશેષં
યથા ભવતિ તથા તુભ્યમહં પ્રવદામિ ।

તદેવાત્મતત્ત્વં સોપાયમાહ—

આત્મમન્ત્રસ્ય હંસસ્ય પરસ્પરસમન્વયાત્ ॥ ૪॥

યોગેન ગતકામાનાં ભાવના બ્રહ્મ ચક્ષતે ।

આત્મનિ તાત્પર્યેણ પર્યવસન્નસ્ય પ્રણવાત્મકસ્ય મન્ત્રસ્ય
તાત્પર્યવિષયસ્ય, હંસસ્ય હન્તિ સ્વતત્ત્વજ્ઞાનેન
જ્ઞાતૃસંસારમિતિ હંસઃ તસ્ય પરમાત્મનઃ,
પરસ્પરસમન્વયાત્
અન્યોન્યપ્રતિપાદ્યપ્રતિપાદકભાવસંસર્ગાત્, અનેન
સર્વવેદાન્તતાત્પર્યગોચરત્વમ્ ' તત્તુ સમન્વયાત્ '
ઇતિ સમન્વયાધિકરણોક્તં દર્શિતમ્; યોગેન
આત્મતત્ત્વવિચારાખ્યેન,
ગતકામાનાં નષ્ટારિષડ્વર્ગાણામ્—અનેન જ્ઞાનપ્રતિ-
બન્ધકકલ્મષનિવૃત્તિઃ દર્શિતા; તેષાં યા ભાવના
' તત્ત્વમસિ ' ઇત્યાદિવાક્યજન્યા ચરમવૃત્તિઃ,
તન્નિવૃત્તિર્વા,
તજ્જન્યાવિદ્યાનિવૃત્તિર્વા, તન્નિવૃત્ત્યધિષ્ઠાનં વા, સા
બ્રહ્મેતિ ચક્ષતે
પ્રાહુઃ તત્ત્વજ્ઞાઃ ઇતિ શેષઃ ।

તદેવ તત્ત્વજ્ઞાનં તન્નિવર્ત્યાવિદ્યાનિવૃત્તિં ચ આહ—

શરીરિણામજસ્યાન્તં હંસત્વં પારદર્શનમ્ ॥ ૫॥

હંસો હંસાક્ષરં ચૈતત્કૂટસ્થં યત્તદક્ષરમ્ ।

તદ્વિદ્વાનક્ષરં પ્રાપ્ય જહ્યાન્મરણજન્મની ॥ ૬॥

અજસ્ય જીવસ્ય અન્તમ્ અવધિભૂતં હંસત્વં
પરબ્રહ્મસ્વરૂપત્વં શરીરિણાં જીવાનાં પારદર્શનં
પરમજ્ઞાનં હંસઃ બ્રહ્મ હંસાક્ષરં ચ પ્રણવં ચ
એતત્કૂટસ્થં યત્,એતદુભયસાક્ષિભૂતં યત્,
તદક્ષરમિત્યુચ્યતે ।
અનેન ત્રિવિધપરિચ્છેદશૂન્યત્વં દર્શિતમ્ । તત્સ્વરૂપં
વિદ્વાન્
વિવેકીસન્ તદક્ષરં વસ્તુ પ્રાપ્ય
મરણજન્મનીજનનમરણપ્રવાહરૂપં
સંસારં જહ્યાત્ ત્યજેદિતિ યાવત્ ॥

સા ચ મુક્તિઃ જીવપરમાત્મનોરૈક્યમિતિ પ્રતિપાદયતિ—

અધ્યારોપાપવાદાભ્યાં નિષ્પ્રપઞ્ચં પ્રપઞ્ચ્યતે—

કાકીમુખં કકારાન્તમુકારશ્ચેતનાકૃતિઃ ।
મકારસ્ય તુ લુપ્તસ્ય કોઽર્થઃ સમ્પ્રતિપદ્યતે ॥ ૭॥

કં ચ અકં ચ કાકે સુખદુઃખે, તે અસ્ય સ્ત ઇતિ કાકી
જીવઃ અવિદ્યાપ્રતિબિમ્બઃ, તસ્ય મુખં મુખસ્થાનીયં
બિમ્બભૂતં યદ્બ્રહ્મ, તત્પ્રતિપાદકં યત્ કકારાન્તં,
મુખમિત્યેતત્ કાકાક્ષિન્યાયેન અત્રાપિ સંબધ્યતે । તથા ચ
શબ્દશ્લેષઃ મુખભૂતકકારસ્ય કાકીત્યત્ર પ્રાથમિક-
કકારસ્ય અન્તમ્ અન્તિમં યદક્ષરમ્ અકારાત્મકં
પઞ્ચીકૃતપઞ્ચમહાભૂતાનિ તત્કાર્યાણિ સર્વં
વિરાડિત્યુચ્યતે । એતત્ સ્થૂલશરીરમાત્મનઃ ।
ઇન્દ્રિયૈરર્થોપલબ્ધિર્જાગરિતમ્ । તદુભયાભિમાન્યાત્મા
વિશ્વઃ ।
એતત્ત્રયમ્ અકારસ્યાર્થઃ । ઉકારશ્ચેતનાકૃતિઃ ।
કાકીમુખેત્યત્ર
મકારાત્ પરો ય ઉકારઃ અપઞ્ચીકૃતપઞ્ચમહાભૂતાનિ
તત્કાર્યં
સપ્તદશકં લિઙ્ગં હિરણ્યગર્ભ ઇત્યુચ્યતે । એતત્
સૂક્ષ્મરીરમાત્મનઃ । કરણેષૂપસંહૃતેષુ
જાગરિતસંસ્કારજન્ય-
પ્રત્યયઃ સવિષયઃ સ્વપ્નઃ, તદુભયાભિમાની આત્મા તૈજસઃ ।
એતત્ત્રયમુકારસ્યાર્થઃ । અત એવ
ઉકારશ્ચેતનાકૃતિરિત્યુક્તમ્ ।
ચેતનાકૃતિઃ ચેતનસ્ય હિરણ્યગર્ભાત્મકતૈજસસ્ય આકૃતિઃ
વાચકઃ । મકારસ્ય — કાકીમુખેત્યત્ર
ઉકારાત્પૂર્વમભિહિતો
યો મકારઃ શરીરદ્વયકારણમાત્માજ્ઞાનં સાભાસં
અવ્યાકૃતમિત્યુચ્યતે । તચ્ચ ન સત્, નાસત્, નાપિ
સદસત્; ન ભિન્નમ્, નાભિન્નમ્, નાપિ ભિન્નાભિન્નં

કુતશ્ચિત્
ન નિરવયવમ્, સાવયવમ્, નોભયમ્ :
કેવલબ્રહ્માત્મૈકત્વ-
જ્ઞાનાપનોદ્યમ્ । સર્વપ્રકારકજ્ઞાનોપસંહારો બુદ્ધેઃ
કારણાત્મનાવસ્થાનં સુષુપ્તિઃ । તદુભયાભિમાન્યાત્મા
પ્રાજ્ઞઃ । એતત્ત્રયં તસ્ય મકારસ્યાર્થઃ । લુપ્તસ્ય—અકાર
ઉકારે, ઉકારો મકારે, મકાર ઓંકારે, એવં લુપ્તસ્ય કોઽર્થઃ
કકારાત્પરો યઃ અકારઃ તસ્ય યોઽર્થઃ લક્ષ્યસ્વરૂપં
મકારાત્પરસ્યોંકારસ્ય
અર્થઃ લક્ષ્યસ્વરૂપમ્, ઓંકારાત્માસાક્ષી કેવલચિન્માત્ર-
સ્વરૂપઃ નાજ્ઞાનં તત્કાર્યં ચ, કિં તુ નિત્યશુદ્ધબુદ્ધ-
મુક્તસત્યપરમાનન્દાદ્વિતીયં બ્રહ્મૈવ સમ્પ્રતિપદ્યતે તદૈક્યં
પ્રાપ્નોતીત્યર્થઃ । ' અયમાત્મા બ્રહ્મ ' ' સ
યશ્ચાયં પુરુષે યશ્ચાસાવાદિત્યે સ એકઃ ' '
તત્ત્વમસિ '
' અહં બ્રહ્માસ્મિ ' ઇત્યાદિશ્રુતિભ્ય ઇતિ ભાવઃ ॥

યદ્વા પાઠાન્તરે—

કાકીમુખકકારાન્તમુકારશ્ચેતનાકૃતિઃ ।
અકારસ્ય તુ લુપ્તસ્ય કોઽર્થઃ સમ્પ્રતિપદ્યતે ॥

કં ચ અકં ચ કાકે સુખદુઃખે, તે અસ્ય સ્ત ઇતિ કાકી
જીવઃ તત્પ્રતિપાદકશબ્દસ્ય મુખે અગ્રે યઃ કકારઃ તસ્યાન્તઃ અકારઃ
બ્રહ્મ ચેતનાકૃતિઃ જીવાકારવદિત્યર્થઃ । બ્રહ્મૈવ
સ્વાવિદ્યયા સંસરતિ ઇતિ ન્યાયાત્ । મકારસ્ય જીવત્વાકારસ્ય
લુપ્તસ્યાપગતસ્ય કોઽર્થઃ
અખણ્ડાદ્વિતીયસચ્ચિદાનન્દસ્વરૂપોઽર્થઃ ।
તં કાકીમુખેત્યાદ્યુક્તપ્રકારેણૈક્યાનુસન્ધાનવાન્
સમ્પ્રતિપદ્યતે
પ્રાપ્નોતિ ઇત્યર્થઃ । યદ્વા, હે કાકીમુખ બ્રહ્મ ત્વં
કકારાન્તઃ
કકારસ્યાન્તિમો વર્ણો ય અકારઃ તત્પ્રતિપાદ્યબ્રહ્મૈવેત્યર્થઃ ।

ઉકારઃ મૂલપ્રકૃતિઃ તસ્ય બ્રહ્મણઃ ચેતના ચેતયમાના આકૃતિઃ શક્તિઃ । મકારસ્ય ચ લુપ્તસ્ય પરિણમમાનાવિદ્યા-લોપવતો બ્રહ્મણઃ કોઽર્થઃ કકારાત્પરો ય અકારઃ તસ્ય યોઽર્થઃ લક્ષ્યસ્વરૂપં તત્સમ્પ્રતિપદ્યતે તદૈક્યં પ્રાપ્નોતીત્યર્થઃ । એવમુપાસ્સ્વેતિ શેષઃ । તથા ચ શ્રુતિઃ ' આપ્લવસ્વ પ્રપ્લવસ્વ, આણ્ડી ભવ જ મા મુહુઃ, સુખાદીં દુઃખનિધનામ્, પ્રતિમુઞ્ચસ્વ સ્વાં પુરમ્ ' ઇતિ । અસ્યાર્થઃ—હે જ જનનમરણ-યુક્તજીવ ત્વમાપ્લવસ્વ જીવન્મુક્તો ભવ પ્રપ્લવસ્ય સાક્ષાન્મુક્તો ભવ, આણ્ડી બ્રહ્માણ્ડાન્તર્વર્તી સંસારિ મુહુર્મા ભવ મા ભૂઃ । સંસારી ચેત્ કિમપરાધ ઇત્યાશઙ્ક્યાહ—સુખાદીં વૈષયિકસુખહેતું દુઃખનિધનાં દુઃખમેવ નિધને અન્તે, યસ્યાસ્તાં સ્વાં પુરં સ્થૂલસૂક્ષ્મરૂપદેહદ્વયં પ્રતિમુઞ્ચસ્વ ત્યજ ।

એવં યોગધારણયોપાસકસ્ય પ્રાણાયામપરાયણસ્ય નાન્તરીયકફલમપ્યાહ—

ગચ્છંસ્તિષ્ઠન્સદા કાલં વાયુસ્વીકરણં પરમ્ ।
સર્વકાલપ્રયોગેન સહસ્રાયુર્ભવેન્નરઃ ॥ ૮॥

નરઃ ' શતાયુઃ પુરુષઃ શતેન્દ્રિયઃ ' ઇતિ પરિમિતાયુરપિ ગચ્છન્ ગમનકાલે તિષ્ઠન્ અવસ્થાનકાલે સદા કાલં સર્વસ્મિન્કાલે શયનાદિકાલાન્તરે પરં વિશેષેણ વાયુસ્વીકરણં પ્રાણાયામં કુર્વન્ તેન સાર્વકાલપ્રયોગેન સાર્વકાલિકવાયુધારણયા સહસ્રાયુઃ સહસ્રવર્ષજીવી ભવેત્ ભૂયાદિત્યર્થઃ ॥

નનુ પરમફલં કદા ભવતીત્યત આહ—

યાવત્પશ્યેત્ખગાકારં તદાકારં વિચિન્તયેત્ ।

ખગાકારં હંસસ્વરૂપં યાવત્પશ્યેત્ યાવત્પર્યન્તં સાક્ષાત્કુર્યાત્, તાવત્પર્યન્તં તદાકારં પરબ્રહ્મસ્વરૂપં

પૂર્વોક્તધારણયા પ્રવૃદ્ધાયુઃ પુરુષઃ વિચિન્તયેત્
ધ્યાયેદિત્યર્થઃ ॥

તાદૃશાત્મસાક્ષાત્કારાર્થં નૈરન્તર્યેણ આત્મજગતો-
ऽભેદધ્યાનમાહ—

ખમધ્યે કુરુ ચાત્માનમાત્મમધ્યે ચ ખં કુરુ ।
આત્માનં ખમયં કૃત્વા ન કિંચિદપિ ચિન્તયેત્ ॥ ૯॥

ખમધ્યે દહરાકાશમધ્યે આત્માનં પરમાત્માનં
કુરુ એતદભિન્નસત્તાત્મકમિતિ ભાવયેદિત્યર્થઃ । આત્મમધ્યે ચ
પરમાત્મનિ ખં કુરુ આકાશં કુરુ તદુપાદાનકં ભાવયેત્ ।
આત્માનં પરમાત્માનં ખમયમ્ આકાશાત્મકં કૃત્વા
કિંચિદપિ બ્રહ્મવ્યતિરિક્તમન્યદપિ ન ચિન્તયેત્ ન
ધ્યાયેદિત્યર્થઃ । યદ્વા, ખ-શબ્દેન જીવોऽભિધીયતે,
'
આકાશશરીરં બ્રહ્મ ' ઇત્યાદિશ્રુતેઃ । આત્મશબ્દેન
પરમાત્મા
અભિધીયતે । તયોરૈક્યં બુદ્ધ્વ ન કિંચિદપિ ચિન્તયેદિતિ ॥

એવમુક્તપ્રકારેણ યોગી ભૂત્વા બ્રહ્મજ્ઞાનનિષ્ઠ એવ
સ્યાત્ ઇત્યાહ—

સ્થિરબુદ્ધિરસંમૂઢો બ્રહ્મવિદ્બ્રહ્મણિ સ્થિતઃ ।
બહિર્વ્યોમસ્થિતં નિત્યં નાસાગ્રે ચ વ્યવસ્થિતમ્ ।
નિષ્કલં તં વિજાનીયાચ્છ્વાસો યત્ર લયં ગતઃ ॥ ૧૦॥

બ્રહ્મવિત્ ઉક્તપ્રકારેણ બ્રહ્મજ્ઞાની સન્ સ્થિરબુદ્ધિઃ
નિશ્ચલજ્ઞાની ભૂત્વા અસંમૂઢઃ અજ્ઞાનરહિતઃ સન્
બ્રહ્મણિસ્થિતઃ બ્રહ્મનિષ્ઠ એવ નિત્યં યત્ર શ્વાસઃ શ્વાસવાયુઃ
લયં ગતઃ નાશં પ્રાપ્તઃ, તત્ર નાસાગ્રે વ્યવસ્થિતં
બહિર્વ્યોમસ્થિતં બહિરાકાશસ્થિતં ચ નિષ્કલં કલાતીતં કં
બ્રહ્મ
વિજાનીયાત્ બુધ્યાત્ ॥

બ્રહ્મજ્ઞાનનિષ્ઠસ્ય મનોનૈશ્ચલ્યાર્થં ધારણા-

વિશેષમાહ—

પુટદ્વયવિનિર્મુક્તો વાયુર્યત્ર વિલીયતે ॥ ૧૧॥

તત્ર સંસ્થં મનઃ કૃત્વા તં ધ્યાયેત્પાર્થ ઈશ્વરમ્ ॥ ૧૨॥

હે પાર્થ પુટદ્વયનિર્મુક્તઃ નાસારન્ધ્રદ્વયવિનિર્ગતઃ
વાયુઃ યત્ર વિલીયતે લયં ગચ્છતિ, તસ્મિન્માર્ગે સમ્યક્
સ્થિતં મનઃ કૃત્વા તમ્ ઈશ્વરં ધ્યાયેત્
વક્ષ્યમાણપ્રકારેણ
ધ્યાયેત્ ॥

તમેવ પ્રકારમાહ—

નિર્મલં તં વિજાનીયાત્ષડૂર્મિરહિતં શિવમ્ ।

નિર્મલં નિષ્કૃષ્ટાહંકારચૈતન્યાત્મકમ્, અત એવ
ષડૂર્મિરહિતં ક્ષુત્પિપાસાદિહીનં શિવં મઙ્ગલસ્વરૂપમિતિ
વિજાનીયાત્ ધ્યાયેદિત્યર્થઃ

કિં ચ,

પ્રભાશૂન્યં મનઃશૂન્યં બુદ્ધિશૂન્યં નિરામયમ્ ॥ ૧૩॥

સર્વશૂન્યં નિરાભાસં સમાધિસ્તસ્ય લક્ષણમ્ ।
ત્રિશૂન્યં યો વિજાનીયાત્સ તુ મુચ્યેત બન્ધનાત્ ॥ ૧૪॥

પ્રભાશૂન્યં વૃત્ત્યાત્મકપ્રકાશરહિતમ્, તત્ર
હેતુઃ મનઃશૂન્યં મનોરહિતમ્, અત એવ બુદ્ધિશૂન્યં
આસક્તિ-
રહિતં નિરામયં નિર્વ્યાજમ્, અત એવ નિરાભાસં
ભ્રમરહિતમ્,
અત એવ સર્વશૂન્યમ્ સ્વવ્યતિરિક્તવસ્તુમાત્રસ્ય મિથ્યાત્વેન
આનન્દૈકરસં યત્ બ્રહ્મ, તદ્ધ્યાનં સમાધિઃ । તસ્ય તસ્મિન્
સ્થિતસ્ય કિં લક્ષણમિત્યાશઙ્ક્યાહ—ત્રિશૂન્યં પૂર્વોક્ત-
પ્રભાદિશૂન્યં યો વિજાનીયાત્ બુધ્યેત્ । એતેન
જાગ્રદાદ્યવસ્થા-
ત્રયશૂન્યત્વં દર્શિતમ્ પ્રભામનોબુદ્ધિશબ્દૈઃ ક્રમેણ

તાસામભિધાનાત્ । તાદૃશં બ્રહ્મ યો વિજાનીયાત્, સ સમાધિસ્થઃ સંસારબન્ધનાત્ મુચ્યેત મુક્તો ભવતિ ॥

એવં જીવન્મુક્તસ્ય દેહાદિષ્વભિનિવેશો નાસ્તીત્યાહ—

સ્વયમુચ્ચલિતે દેહે દેહી ન્યસ્તસમાધિના ।
નિશ્ચલં તદ્વિજાનીયાત્સમાધિસ્થસ્ય લક્ષણમ્ ॥ ૧૫॥

દેહે સ્વયમ્ અનાદિપ્રારબ્ધકર્મવાસનાવશાત્ ઉચ્ચલિતે ગમનાદિકં કુર્વત્યપિ દેહી જીવઃ ન્યસ્તસમાધિના નિશ્ચલસમાધિયોગેન નિશ્ચલં યથા ભવતિ તથા તં પરમાત્માનં વિજાનીયાત્ । તદેવ સમાધિસ્થિતસ્ય આત્મયોગ-સ્થિતસ્ય લક્ષણમિત્યુચ્યતે ॥

ઇતોઽપ્યાત્મજ્ઞસ્ય લક્ષણમુચ્યતે—

અમાત્રં શબ્દરહિતં સ્વરવ્યઞ્જનવર્જિતમ્ ।
બિન્દુનાદકલાતીતં યસ્તં વેદ સ વેદવિત્ ॥ ૧૬॥

અમાત્રં હ્રસ્વદીર્ઘપ્લુતાદિરહિતં શબ્દરહિતં
શબ્દાતીતમ્, સ્વરવ્યઞ્જનવર્જિતં
અક્ષરસમૂહાત્મકપદાનભિધેયં
બિન્દુનાદકલાતીતમ્—અનુસ્વારો બિન્દુઃ સંવૃતે ગલવિવરે
યદ્દીર્ઘ-
ઘણ્ટાનિર્હ્રાદવદનુરણનં સ નાદઃ, કલા નાદૈકદેશઃ
તૈરતીતમ્, ન યથાકથંચિચ્છબ્દવાચ્યમિત્યર્થઃ ।
એતાદૃશં બ્રહ્મ
યો વેદ, સ વેદવિત્ સકલવેદાન્તતાત્પર્યજ્ઞઃ નાન્ય
ઇત્યર્થઃ ॥

એવં પ્રાપ્તાત્મતત્ત્વજ્ઞાનસ્ય અસમ્ભાવનાવિપરીત-ભાવનાદિનિવૃત્તૌ સત્યાં ન કિંચિત્કૃત્યમસ્તીત્યાહ—

પ્રાપ્તે જ્ઞાનેન વિજ્ઞાને જ્ઞેયે ચ હૃદિ સંસ્થિતે ।
લબ્ધશાન્તિપદે દેહે ન યોગો નૈવ ધારણા ॥ ૧૭॥

જ્ઞાનેન પરોક્ષાત્મકેન વિજ્ઞાને અપરોક્ષાનુભવાત્મકે,

યદ્વા, જ્ઞાનેન શાસ્ત્રાચાર્યોપદેશજન્યેન વિજ્ઞાને
અનુભવાત્મકે પ્રાપ્તે સતિ, જ્ઞેયે સર્વવેદાન્તતાત્પર્યગોચરે
પરમાત્મનિ હૃદિ સંસ્થિતે હૃદ્યપરોક્ષતયા ભાસમાને
સતિ, દેહે દેહોપાધિમતિ જીવે લબ્ધશાન્તિપદે
સમ્પ્રાપ્તબ્રહ્મભાવે સતિ, તદા, યોગોઽપિ નાસ્તિ ધારણા
ચ નાસ્તિ;
સિદ્ધે ફલે સાધનેન પ્રયોજનાભાવાદિતિ ભાવઃ ॥

એવમાત્મતત્ત્વાપરોક્ષજ્ઞાનેન મુક્તઃ સન્ ઈશ્વર એવ
જાયતે ઇતિ તસ્ય સ્વરૂપમાહ—

યો વેદાદૌ સ્વરઃ પ્રોક્તો વેદાન્તે ચ પ્રતિષ્ઠિતઃ ।
તસ્ય પ્રકૃતિલીનસ્ય યઃ પરઃ સ મહેશ્વરઃ ॥ ૧૮॥

વેદાદૌ સર્વવેદાનામાદૌ વેદસ્યાધઃસ્રવણપરિહારાય
વિધીયમાનઃ વેદાન્તે ચ સર્વવેદાનામન્તે ચ ઉપર્યુત્ક્રમણ-
પરિહારાય પ્રતિષ્ઠિતઃ સંસ્થાપિતઃ, ચકારાત્ સર્વવેદ-
રક્ષણાય વેદમધ્યે ચ નિપાતિતઃ યઃ સ્વરઃ પ્રણવાત્મકઃ,
તસ્ય પ્રણવસ્ય પ્રકૃતૌ પરાવસ્થાયાં લીનસ્ય યઃ પરઃ
પરાદિવાક્ચતુષ્ટયોદ્બોધકઃ, ઉપલક્ષણં ચૈતત્ સર્વ-
પ્રાણેન્દ્રિયકરણવર્ગપ્રબોધકઃ સર્વનિયન્તા સર્વાન્તર્યામી
યો મહેશ્વર ઇતિ પ્રસિદ્ધઃ સ એવ આત્મતત્ત્વજ્ઞાની, નાન્ય
ઇત્યર્થઃ ॥

આત્મતત્ત્વાપરોક્ષાનુભવાત્પૂર્વં યાવાન્ તત્સાધન-
પ્રયાસઃ કૃતઃ, જાતે ચ તસ્મિન્ અનુભવે સ ન કર્તવ્ય ઇતિ
સદૃષ્ટાન્તમાહ—

નાવાર્થી ચ ભવેત્તાવદ્યાવત્પારં ન ગચ્છતિ ।
ઉત્તીર્ણે ચ સરિત્પારે નાવયા કિં પ્રયોજનમ્ ॥ ૧૯॥

યાવત્ યાવત્પર્યન્તં પારં નદીતીરં ન ગચ્છતિ ન
સમ્પ્રાપ્નોતિ, તાવત્ તાવત્પર્યન્તં નાવાર્થી નદીતરણ-
સાધનપ્લવનાર્થી ભવેત્ ભૂયાત્, સરિત્પારે નદીતીરે
ઉત્તીર્ણે સતિ નાવયા નદીતરણસાધનેન કિં પ્રયોજનં કિમપિ

નાસ્તીત્યર્થઃ । તદ્વદત્રાપિ આત્માપરોક્ષે જાતે
શાસ્ત્રાદિભારૈઃ કિં
પ્રયોજનમિતિ ભાવઃ ॥

તદેવ ભઙ્ગ્યન્તરેણ સદૃષ્ટાન્તમાહ—

ગ્રન્થમભ્યસ્ય મેધાવી જ્ઞાનવિજ્ઞાનતત્પરઃ ।
પલાલમિવ ધાન્યાર્થી ત્યજેદ્ગ્રન્થમશેષતઃ ॥ ૨૦॥

મેધાવી બુદ્ધિમાન્ ગ્રન્થમભ્યસ્ય વેદાન્તાદિશ્રવણં કૃત્વા, જ્ઞાને સામાન્યજ્ઞાને વિજ્ઞાને વિશેષાનુભવે તત્પરઃ સન્ ગ્રન્થં સર્વશાસ્ત્રં ત્યજેત્ । અત્ર દૃષ્ટાન્તઃ— ધાન્યાર્થી ધાન્યસહિતં તૃણમાદાય તદ્ગતધાન્યસ્વીકા-રાનન્તરં પલાલં ગતકણિશં તૃણં યથા ત્યજેત્ તદ્વદિત્યર્થઃ ॥

કિંચ —

ઉલ્કાહસ્તો યથા કશ્ચિદ્દ્રવ્યમાલોક્ય તાં ત્યજેત્
જ્ઞાનેન જ્ઞેયમાલોક્ય પશ્ચાજ્જ્ઞાનં પરિત્યજેત્ ॥ ૨૧॥

કશ્ચિત્ લોકે અન્ધકારસ્થિતદ્રવ્યદર્શનાર્થી સન્, યથા ઉલ્કાહસ્તો ભવતિ, પશ્ચાદ્દ્રવ્યમાલોક્ય તદનન્તરં તામુલ્કાં યથા ત્યજેત્, તથા જ્ઞાનેન જ્ઞાનસાધનેન જ્ઞેયં બ્રહ્મ આલોક્ય અપરોક્ષીકૃત્ય પશ્ચાત્ જ્ઞાનં જ્ઞાનસાધનં પરિત્યજેત્ ઇત્યર્થઃ ।

જાતે ચાપરોક્ષજ્ઞાને, તેન પ્રયોજનાભાવાત્ સાધનં પરિત્યાજ્યમિત્યેતદ્દૃષ્ટાન્તાન્તરેણાપ્યાહ—

યથામૃતેન તૃપ્તસ્ય પયસા કિં પ્રયોજનમ્ ।
એવં તં પરમં જ્ઞાત્વા વેદૈર્નાસ્તિ પ્રયોજનમ્ ॥ ૨૨॥

યથા અમૃતેન સાગરમથનાદ્ભૂતેન અમૃતેન તૃપ્તસ્ય સન્તુષ્ટસ્ય પયસા ક્ષીરેણ પ્રયોજનં નાસ્તિ, એવં પરમં તં જ્ઞાત્વા પરમાત્માનમપરોક્ષીકૃત્ય વેદૈઃ વેદાન્ત-શાસ્ત્રાદિભિઃ કિં પ્રયોજનમ્, ન કિમપીત્યર્થઃ ॥

કિંચ, તત્ત્વજ્ઞાનિનઃ વિધિનિષેધાદિકર્તવ્યમપિ નાસ્તીત્યાહ—

જ્ઞાનામૃતેન તૃપ્તસ્ય કૃતકૃત્યસ્ય યોગિનઃ ।
ન ચાસ્તિ કિઞ્ચિત્કર્તવ્યમસ્તિ ચેન્ન સ તત્ત્વવિત્ ॥ ૨૩॥

જ્ઞાનામૃતેન તૃપ્તસ્ય આનન્દૈકરસં પ્રાપ્તસ્ય કૃત-
કૃત્યસ્ય કૃતાર્થસ્ય યોગિનઃ મુક્તસ્ય કિંચિદપિ
વિધિનિષેધાદિ કર્તવ્યં નાસ્તિ, તત્ત્વેન ઉત્તીર્ણત્વાદિતિ ભાવઃ ।
કર્તવ્યમપિ લોકસંગ્રહાર્થમેવ, યદ્યભિનિવેશેન કર્માસક્તિરસ્તિ,
તર્હિ સ તત્ત્વવિન્ન ભવતિ, આરૂઢો ન ભવતીત્યર્થઃ ॥

અર્થજ્ઞાનં વિના કેવલં વેદપાઠમાત્રેણ વેદવિત્ત્વં
નાસ્તિ, કિં તુ વેદતાત્પર્યગોચરબ્રહ્મજ્ઞાનેનૈવ
વેદવિત્ત્વમિત્યાહ—

તૈલધારામિવાચ્છિન્નં દીર્ઘઘણ્ટાનિનાદવત્ ।
અવાચ્યં પ્રણવસ્યાગ્રં યસ્તં વેદ સ વેદવિત્ ॥ ૨૪॥

તૈલધારામિવાચ્છિન્નં સન્તતધારાવત્
વિચ્છેદરહિતં દીર્ઘઘણ્ટાનિનાદવત્
અતિદીર્ઘઘણ્ટાધ્વન્યગ્રવચ્ચ
વિચ્છેદરહિતં અવાચ્યમ્ અવાઙ્મનસગોચરં પ્રણવસ્ય
અકારોમકારબિન્દુનાદાત્મકસ્ય સકલવેદસારસ્ય અગ્રં લક્ષ્યં
બ્રહ્મ યો વેદ, સ વેદવિત્ વેદાન્તાર્થજ્ઞાની; નાન્ય ઇત્યર્થઃ ॥

તત્ત્વજ્ઞાનિનઃ સમાધિસાધનસ્વરૂપમાહ—

આત્માનમરણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાભ્યાસાદેવં પશ્યેન્નિગૂઢવત્ ॥ ૨૫॥

આત્માનં આત્મનિ કર્તૃત્વાદ્યધ્યાસવન્તં જીવં અરણિં
કૃત્વા અધરારણિં ભાવયિત્વા, પ્રણવં પરમાત્મપ્રતિપાદકં
શબ્દં ઉત્તરારણિં કૃત્વા ભાવયિત્વા,
ધ્યાનનિર્મથનાભ્યાસાત્
ધ્યાનરૂપમથનેન પૌનઃપુન્યેન પૂર્વોક્તપ્રકારેણ નિગૂઢવત્
પાણ્ડિત્યાપ્રકટનેન યો વર્તતે, સ એવં પરમાત્માનં પશ્યેત્;

નાન્ય ઇત્યર્થઃ ॥

યાવદપરોક્ષાનુભવપર્યન્તં સ્વયંપ્રકાશબ્રહ્મ-
ધારણામાહ—

તાદૃશં પરમં રૂપં સ્મરેત્પાર્થ હ્યનન્યધીઃ ।
વિધૂમાગ્નિનિભં દેવં પશ્યેદન્ત્યન્તનિર્મલમ્ ॥ ૨૬॥

હે પાર્થ, વિધૂમાગ્નિનિભં વિગતધૂમાગ્નિરિવ
દ્યોતમાનમ્ અત્યન્તનિર્મલમ્ અતિસ્વચ્છં દેવં સ્વયં-
પ્રકાશં પરમાત્માનં યાવત્પશ્યેત્ અપરોક્ષીકુર્યાત્,
તાવત્ તાદૃશં પરમં સર્વોત્કૃષ્ટં રૂપં બ્રહ્મ-
સ્વરૂપમ્, અનન્યધીરિતિ અનન્યચિત્તઃ સન્ સંસ્મરેત્
બ્રહ્મધારણં કુર્યાદિત્યર્થઃ ॥

ભાવનાપ્રકારમેવ બ્રહ્મસ્વરૂપપ્રકટનવ્યાજેન
વિશદયતિ—

દૂરસ્થોઽપિ ન દૂરસ્થઃ પિણ્ડસ્થઃ પિણ્ડવર્જિતઃ ।
વિમલઃ સર્વદા દેહી સર્વવ્યાપી નિરઞ્જનઃ ॥ ૨૭॥

દેહી જીવઃ સર્વદા સર્વસ્મિન્ કાલે દૂરસ્થોઽપિ અજ્ઞસ્ય
પરોક્ષવત્ સ્થિતોઽપિ ન દૂરસ્થઃ પરોક્ષસ્થિતો ન ભવતિ;
કિં તુ સર્વદાપિ અપરોક્ષ એવેત્યર્થઃ । પિણ્ડસ્થોઽપિ અજ્ઞસ્ય
શરીરસમ્બન્ધાધ્યાસાત્ પરિચ્છિન્નવત્ ભાસમાનોઽપિ,
પિણ્ડવર્જિતઃ શરીરસમ્બન્ધધ્યાસરહિતઃ; તત્ર હેતુઃ—
વિમલઃ નિર્મલઃ સર્વવ્યાપી સર્વતઃ પરિપૂર્ણઃ નિરઞ્જનઃ સ્વયં-
પ્રકાશશ્ચ । એવં ધ્યાયેદિતિ પૂર્વેણ સમ્બન્ધઃ ॥

કિંચ, દેહાધ્યાસાત્ પ્રતીયમાનં
કર્તૃત્વભોક્તૃત્વાદિકમાત્મનો નાસ્તિ ઇત્યાહ—

કાયસ્થોઽપિ ન કાયસ્થઃ કાયસ્થોઽપિ ન જાયતે ।
કાયસ્થોઽપિ ન ભુઞ્જાનઃ કાયસ્થોઽપિ ન બધ્યતે ॥ ૨૮॥

દેહી જીવઃ કાયસ્થોઽપિ શરીરાધ્યાસવાનપિ ન
કાયસ્તઃ શરીરનિમિત્તબન્ધરહિતઃ । કાયસ્થોઽપિ

જન્માદિવચ્છરીરસ્થોઽપિ ન જાયતે શરીરનિમિત્તજન્મરહિત ઇત્યર્થઃ ।
કાયસ્થોઽપિ ભોગસાધનીભૂતશરીરસ્થોઽપિ ન ભુઞ્જાનઃ ભોગરહિતઃ ।
કાયસ્થોઽપિ બન્ધહેતુભૂતદેહસ્થોઽપિ ન બધ્યતે બન્ધનં
ન પ્રાપ્નોતીત્યર્થઃ ।

કિંચ—

કાયસ્થોઽપિ ન લિપ્તઃ સ્યાત્કાયસ્થોઽપિ ન બાધ્યતે ।

કાયસ્થોઽપિ સુખદુઃખાદિહેતુભૂતદેહસમ્બન્ધોઽપિ
ન લિપ્તઃ સ્યાત્ સુખદુઃખાદિસમ્બન્ધરહિત ઇત્યર્થઃ ।
કાયસ્થોઽપિ મરણધર્મવદ્દેહસ્થોઽપિ ન બાધ્યતે ન મ્રિયત ઇત્યર્થઃ ।
અનેન જન્માદિષડ્ભાવવિકારશૂન્યત્વં દર્શિતમ્ ॥

યદધ્યાસેન આત્મમોહાત્સંસૃતિઃ, તદપવાદેન તત્રૈવ
દેહાન્તઃકરણાદાવાત્મા વિચારણીય ઇત્યાહ—

તિલમધ્યે યથા તૈલં ક્ષીરમધ્યે યથા ઘૃતમ્ ॥ ૨૯॥

પુષ્પમધ્યે યથા ગન્ધઃ ફલમધ્યે યથા રસઃ ।
કાષ્ઠાગ્નિવત્પ્રકાશેત આકાશે વાયુવચ્ચરેત્ ॥ ૩૦॥

આત્મા તિલમધ્યે તૈલાચ્છાદકતિલેષુ યથા તૈલમ્,
યન્ત્રાદિના તિલે નિષ્પિષ્ટે યથા તિલાત્પૃથક્ તૈલં શુદ્ધં
ભાસતે, યથા ક્ષીરમધ્યે ઘૃતાચ્છાદકક્ષીરાણાં મધ્યે
ક્ષીરત્વાપનોદકોપાયદ્વારા દધિપરિણામે મથનેનાપનીતે
નવનીતાદિપરિણામદ્વારા અગ્નિસંયોગાત્ યથા ઘૃતં
પ્રતીયતે, તથા પુષ્પાણાં મધ્યે યથા ગન્ધઃ પ્રતીયતે,
ફલમધ્યે ત્વગસ્થ્યાદિહેયાંશપરિત્યાગેન યથા રસો
ભાસતે, આકાશે યથા વાયુઃ સર્વગતઃ સન્ વાતિ
સંચરતિ, તથા કાષ્ઠાગ્નિવત્ અરણ્યાદિસ્થિતાગ્નિઃ
મથનાદિના મથિતે
યથા કાષ્ઠભાવં વિહાય સ્વયંપ્રકાશતયા ભાસતે,
તદ્વદાત્માપિ અશ્નમયાદિપઞ્ચકોશેષુ મધ્યે હેયાંશ-
પરિત્યાગેન આનન્દાત્મકતયા સ્વયંપ્રકાશઃ સન્ ભાસત
ઇત્યર્થઃ ॥

एतदेव दार्ष्टान्तिके सर्वं स्पष्टमुपपादयति—

તથા સર્વગતો દેહી દેહમધ્યે વ્યવસ્થિતઃ ।
મનસ્થો દેશિનાં દેવો મનોમધ્યે વ્યવસ્થિતઃ ॥ ૩૧॥

તથા પૂર્વોક્તતૈલાદિવત્ સર્વગતઃ સર્વવ્યાપી દેહી જીવઃ દેહમધ્યે નાનાભિન્નતિર્યગ્દેહાદિદેહમધ્યે વ્યવસ્થિતઃ નાનાભિન્નતિલેષુ તૈલવત્ એકત્વેન સ્થિત ઇત્યર્થઃ । દેહિનાં તત્તદ્દેહભેદેન ભિન્નાનાં જીવાનાં મનસ્થઃ તત્તદન્તઃ-કરણસ્થઃ દેવઃ ઈશ્વરઃ મનોમધ્યે તત્તદ્દુષ્ટાદુષ્ટાન્તઃકરણેષુ વ્યવસ્થિતઃ સાક્ષિતયા ભાસત ઇત્યર્થઃ ॥

તાદૃશબ્રહ્માપરોક્ષ્યેણ મુચ્યન્ત ઇત્યાહ—

મનસ્થં મનમધ્યસ્થં મધ્યસ્થં મનવર્જિતમ્ ।
મનસા મન આલોક્ય સ્વયં સિધ્યન્તિ યોગિનઃ ॥ ૩૨॥

મનસ્થં મનોઽવચ્છિન્નં મનમધ્યસ્થં મનઃસાક્ષિ-ભૂતં મધ્યસ્થં સર્વસાક્ષિભૂતમ્ મનવર્જિતં સઙ્કલ્પવિકલ્પાદિરહિતં મનઃ અવબોધાત્મકં દેવં મનસા પરિશુદ્ધાન્તઃકરણેન આલોક્ય તદ્ગોચરાપરોક્ષચરમવૃત્તિં લબ્ધ્વા યોગિનઃ સ્વયમેવ સિધ્યન્તિ નિવૃત્તાવિદ્યકા મુક્તા ભવન્તીત્યર્થઃ ॥

આકાશં માનસં કૃત્વા મનઃ કૃત્વા નિરાસ્પદમ્ ।
નિશ્ચલં તદ્વિજાનીયાત્સમાધિસ્થસ્ય લક્ષણમ્ ॥ ૩૩॥

આકાશવન્માનસં મનો નિર્મલં કૃત્વા મનઃ સઙ્કલ્પવિકલ્પાત્મકં નિરાસ્પદમ્ નિર્વિષયં કૃત્વા નિશ્ચલં નિષ્ક્રિયમીશ્વરં યો વિજાનીયાત્, સ એવ સમાધિસ્થઃ । તાદૃશજ્ઞાનમેવ સમાધિસ્થસ્યાપિ લક્ષણમિત્યર્થઃ ॥

આરૂઢસ્ય લક્ષણમુક્તમ્, આરુરુક્ષોરુપાયમાહ—

યોગામૃતરસં પીત્વા વાયુભક્ષઃ સદા સુખી ।

યમમભ્યસ્યતે નિત્યં સમાધિર્મૃત્યુનાશકૃત્ ॥ ૩૪॥

યોગામૃતરસં પીત્વા યમનિયમાદ્યષ્ટાઙ્ગયોગ-
અમૃતપાનં કૃત્વા તત્તત્પ્રતિપાદકશાસ્ત્રમભ્યસ્યેત્યર્થઃ,
વાયુભક્ષઃ વાયુમાત્રાહરઃ, ઉપલક્ષણમેતત્, હિતમિત-
મેધ્યાશી, સદા સુખી સર્વદા સન્તુષ્ટઃ સન્, યં યમં
મનોનિગ્રહં નિત્યમભ્યસ્યતે, સ સમાધિરિત્યુચ્યતે । સ સમાધિઃ
મૃત્યુનાશકૃત્ જનનમરણસંસારનાશકૃદિત્યર્થઃ ॥

તાદૃશસમાધૌ સ્થિતસ્ય લક્ષણમાહ—

ઊર્ધ્વશૂન્યમધઃશૂન્યં મધ્યશૂન્યં યદાત્મકમ્ ।
સર્વશૂન્યં સ આત્મેતિ સમાધિસ્થસ્ય લક્ષણમ્ ॥ ૩૫॥

ઊર્ધ્વશૂન્યમ્ ઊર્ધ્વદેશપરિચ્છેદરહિતં
અધઃશૂન્યમ્ અધોમધ્યદેશપરિચ્છેદરહિતં સર્વશૂન્યં
દેશકાલાદિપરિચ્છેદરહિતં યદાત્મકં યત્સ્વરૂપમ્, સ
આત્મેતિ ભાવના સમાધિસ્થસ્ય લક્ષણમિત્યર્થઃ ॥

એતસ્યાઇકાન્તિકદૃષ્ટેઃ વિધિનિષેધાતીતત્વમાહ—

શૂન્યભાવિતભાવાત્મા પુણ્યપાપૈઃ પ્રમુચ્યતે ।

શૂન્યમિતિ સર્વપરિચ્છેદરહિતમિતિ ભાવિતઃ વાસિતઃ
ભાવઃ અભિપ્રાયો યસ્યાત્મનઃ તાદૃશઃ સન્
શૂન્યભાવિતભાવાત્મા
યોગી પુણ્યપાપૈઃ વિધિનિષેધપ્રયુક્તૈઃ પ્રમુચ્યતે મુક્તો
ભવતીત્યર્થઃ ॥

એવં ભગવદુપદિષ્ટસમાધૌ વિરોધમસમ્ભવં ચ આહ—

અર્જુન ઉવાચ—

અદૃશ્યે ભાવના નાસ્તિ દૃશ્યમેતદ્વિનશ્યતિ ॥ ૩૬॥

અવર્ણમસ્વરં બ્રહ્મ કથં ધ્યાયન્તિ યોગિનઃ ।

અદૃશ્યે જ્ઞાનાગોચરે વસ્તુનિ ભાવના ધ્યાનં નાસ્તિ;
નનુ તર્હિ દૃશ્યં ભવત્વિતિ ચેત્, દૃશ્યમેતત્સર્વં

વિનશ્યતિ નાશં પ્રાપ્નોતિ શુક્તિકારૂપ્યવત્ । તથા ચ
અવર્ણં રૂપ-
રહિતમ્ અસ્વરં શબ્દાગોચરં બ્રહ્મ યોગિનઃ કથં ધ્યાયન્તિ,
ધ્યાનસ્ય સ્મૃત્યાત્મકત્વેનાનનુભૂતે તદયોગાત્ ઇતિ ભાવઃ ।

ન હિ સાવયવમૂર્ત્યાદિમત્ત્વેન વયં ધ્યાનં બ્રૂમઃ
યેન ત્વયોક્તં ઘટેત, કિં તુ નિર્વિશેષપરબ્રહ્મણ એવ નિર્મલં
નિષ્કલમિત્યાદિના, વેદાન્તજન્યવૃત્તિગોચરત્વેન
તત્સમ્ભવતીત્યભિપ્રાયેણાહ—

શ્રીભગવાનુવાચ—

ઊર્ધ્વપૂર્ણમધઃપૂર્ણં મધ્યપૂર્ણં યદાત્મકમ્ ॥ ૩૭॥

સર્વપૂર્ણં સ આત્મેતિ સમાધિસ્થસ્ય લક્ષણમ્ ।

ઊર્ધ્વાધોમધ્યપૂર્ણશબ્દૈઃ સર્વદેશતઃ સર્વકાલતઃ
પરિચ્છેદં વ્યાવર્તયતિ । યદાત્મકં યત્ એતાદૃશં વસ્તુ
સર્વત્ર પરિપૂર્ણં સ આત્મેતિ યો ધ્યાયતિ, સ સમાધિસ્થઃ ।
તસ્ય લક્ષણમપિ તદેવેત્યર્થઃ ॥

નન્વયં સાલમ્બનયોગો નિરાલમ્બનયોગો વેતિ દ્વેધા
વિકલ્પ્ય તત્ર દોષમાશઙ્ક્યાહ—

અર્જુન ઉઅવાચ—

સાલમ્બસ્યાપ્યનિત્યત્વં નિરાલમ્બસ્ય શૂન્યતા ॥ ૩૮॥

ઉભયોરપિ દુષ્ટત્વાત્કથં ધ્યાયન્તિ યોગિનઃ ।

સાલમ્બસ્ય મૂર્ત્યાધારાદિસહિતસ્ય અનિત્યત્વં વિનાશિત્વમ્,
નિરાલમ્બસ્ય મૂર્ત્યાધારાદિરહિતસ્ય શૂન્યતા શશ-
વિષાણાયિતત્વમ્, એવમુભયોરપિ દુષ્ટત્વાત્
દોષઘટિતત્વાત્ યોગિનઃ કથં ધ્યાયન્તીતિ પ્રશ્નાર્થઃ ॥

યજ્ઞદાનાદિના શુદ્ધાન્તઃકરણસ્ય
વેદાન્તજન્યનિર્વિશેષબ્રહ્મગોચરવૃત્તિસમ્ભવાત્ ન
શૂન્યતેત્યભિપ્રાયેણાહ—

શ્રીભગવાનુવાચ—

હૃદયં નિર્મલં કૃત્વા ચિન્તયિત્વાપ્યનામયમ્ ॥ ૩૯॥

અહમેવ ઇદં સર્વમિતિ પશ્યેત્પરં સુખમ્ ।

હૃદયં ચિત્તં નિર્મલં જ્ઞાનવિરોધિરાગાદિદોષરહિતં કૃત્વા અનામયં ચિન્તયિત્વા ઈશ્વરં ધ્યાત્વા પરં સુખી સન્ એક એવાહમિદં સર્વં જગજ્જાલમહમેવ ન મત્તો વ્યતિરિક્તમન્યત્ ઇતિ પશ્યેત્ અપરોક્ષાનુભવં પ્રાપ્નુયાત્ ઇત્યર્થઃ ॥

અર્થાત્મકસ્ય જગતઃ શબ્દનિરૂપ્યત્વેન શબ્દસ્ય વર્ણાત્મકત્વેન વર્ણાનાં પ્રણવાત્મકત્વેન પ્રણવસ્ય બિન્દ્વાત્મકત્વેન બિન્દોઃ નાદાત્મકત્વેન નાદસ્ય બ્રહ્મધ્યાનસ્થાનાત્મકકલાત્મકત્વેન બ્રહ્મણિ સમન્વયેન બિન્દુનાદકલાતીતં બ્રહ્મ ધ્યાયેદિતિ ભગવતોક્તમ્, તદ્વિવિચ્ય જ્ઞાતું પૃચ્છતિ—

અર્જુન ઉવાચ—

અક્ષરાણિ સમાત્રાણિ સર્વે બિન્દુસમાશ્રિતાઃ ॥ ૪૦॥

બિન્દુભિર્ભિદ્યતે નાદઃ સ નાદઃ કેન ભિદ્યતે ।

હે ભગવન્ સમાત્રાણિ અક્ષરાણિ અકારાદીનિ સર્વે સર્વાણિ લિઙ્ગવ્યત્યયઃ આર્ષઃ, બિન્દુસમાશ્રિતાઃ બિન્દુતન્માત્રાણીત્યર્થઃ । બિન્દુસ્તુ નાદેન ભિદ્યતે નાદતન્માત્રઃ સન્ તત્ર સમન્વેતીત્યર્થઃ । સ નાદઃ કલાયાં સમન્વેતિ । સા કલા
કુત્ર સમન્વેતિ ઇતિ પ્રશ્નાર્થઃ । યદ્યપિ શ્લોકે સ નાદઃ કેન ભિદ્યત ઇતિ
નાદસ્યૈવ સમન્વયઃ પૃષ્ટ ઇતિ ભાતિ, તથાપિ નાદસ્ય કલાસમન્વય
ઇતિ પ્રસિદ્ધત્વાત્ નાદપદં કલોપલક્ષણમ્ ॥

એવં પૃષ્ટો ભગવાન્ બ્રહ્મણિ સમન્વેતિ ઇતિ ઉત્તરમાહ—

શ્રીભગવાનુવાચ—

અનાહતસ્ય શબ્દસ્ય તસ્ય શબ્દસ્ય યો ધ્વનિઃ ॥ ૪૧॥

ધ્વનેરન્તર્ગતં જ્યોતિર્જ્યોતિરન્તર્ગતં મનઃ ।
તન્મનો વિલયં યાતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૪૨॥

અનાહતસ્ય શબ્દસ્ય પરાવસ્થાપન્નપ્રણવસ્ય યઃ ધ્વનિઃ નાદઃ તસ્ય નાદસ્ય જ્યોતિઃ અન્તર્ગતમ્ । તેન તેજોરૂપકલાયાં નાદસ્યાન્તર્ભાવ ઇતિ તાત્પર્યમ્ । કલાન્તર્ભાવમાહ— જ્યોતિરન્તર્ગતં મન ઇતિ । મનસઃ જ્યોતિષ્યન્તર્ભાવો નામ તન્માત્રયા તત્ર વ્યાપ્તિઃ । તથા ચ મનસિ જ્યોતિષઃ કલાયાઃ સમન્વય ઇતિ
ભાવઃ । તત્ મનઃ શબ્દાદિપ્રપઞ્ચકારણભૂતં મનઃ
યત્ર વિલયં યાતિ, યત્ર બ્રહ્મણિ
વેદાન્તજન્યનિર્વિકલ્પકબ્રહ્મ-
ગોચરમનોવૃત્તિઃ લયં યાતિ, તત્ વૃત્તિલયસ્થાનં વૃત્તિ-
લયાત્મકં વા વિષ્ણોઃ પરમમ્ ઉત્કૃષ્ટં પદં સ્વરૂપમિતિ ।
તદુક્તમ્—મનઃ કાયાગ્નિના હન્તીત્યાદિના ॥

પુનસ્તદેવ વિશિનષ્ટિ—

ૐકારધ્વનિનાદેન વાયોઃ સંહરણાન્તિકમ્ ।
નિરાલમ્બં સમુદ્દિશ્ય યત્ર નાદો લયં ગતઃ ॥ ૪૩॥

ઓંકારધ્વનિનાદેન ઓંકારધ્વન્યાત્મકનાદેન સહ વાયોઃ સંહરણાન્તિકં રેચકપૂરકાદિક્રમેણ નિયમિતવાયોરુપસંહાર- પર્યન્તં નિરાલમ્બં નિર્વિશેષં બ્રહ્મ સમુદ્દિશ્ય લક્ષ્યં કૃત્વા ધ્યાયેત્ । યત્ર સ નાદો લયં ગતઃ નાશં પ્રાપ્નુયાત્, તત્ નાદનાશાધિકરણાત્મકં નાદનાશાત્મકં વા વિષ્ણોઃ પરમં પદમિત્યર્થઃ ॥

એવં ધ્યાનપ્રકારેણ શુદ્ધાન્તઃકરણસ્ય આરૂઢસ્ય
પુણ્યપાપે વિધૂય બ્રહ્મસાયુજ્યેઽભિહિતે,
આરુરુક્ષોરપરિશુદ્ધ-
અન્તઃકરણિત્વેન બ્રહ્મસાયુજ્યાસમ્ભવે

ધર્માધર્મવિધૂનનાસમ્ભવેન
તદ્દ્વારા જનનમરણાદિકમવશ્યં ભાવ્યમિતિ મનસિ નિશ્ચિત્ય var ભાવિતવ્યમિતિ
પુનરાવૃત્તિપ્રકારં પૃચ્છતિ—

અર્જુન ઉવાચ—

ભિન્ને પઞ્ચાત્મકે દેહે ગતે પઞ્ચસુ પઞ્ચધા ।
પ્રાણૈર્વિમુક્તે દેહે તુ ધર્માધર્મૌ ક્વ ગચ્છતઃ ॥ ૪૪॥

પઞ્ચાત્મકે પઞ્ચભૂતાત્મકે દેહે સ્થૂલશરીરે
ભિન્ને ગતે સતિ, પઞ્ચસુ પઞ્ચભૂતેષુ પઞ્ચધા
તત્તત્પૃથિવ્યાદ્યા-
કારેણ સ્થિતેષુ સત્સુ, દેહે પ્રાણૈઃ પ્રાણાદિપઞ્ચવાયુભિઃ
વિયુક્તે સતિ, ધર્માધર્મૌ પુણ્યપાપે ક્વ ગચ્છતઃ કુત્ર
યાસ્યતઃ ॥

એવં પૃષ્ટો ભગવાન્ લિઙ્ગશરીરાધારતયા તિષ્ઠત
ઇત્યુત્તરમાહ—

શ્રીભગવાનુવાચ—

ધર્માધર્મૌ મનશ્ચૈવ પઞ્ચભૂતાનિ યાનિ ચ ।
ઇન્દ્રિયાણિ ચ પઞ્ચૈવ યાશ્ચાન્યાઃ પઞ્ચ દેવતાઃ ॥ ૪૫॥

તાશ્ચૈવ મનસા સર્વે નિત્યમેવાભિમાનતઃ ।
જીવેન સહ ગચ્છન્તિ યાવત્તત્ત્વં ન વિન્દતિ ॥ ૪૬॥

ધર્માધર્મૌ પુણ્યપાપે મનશ્ચ અન્તઃકરણં યાનિ ચ
પઞ્ચભૂતાનિ પૃથિવ્યાદીનિ યાનિ ચ પઞ્ચેન્દ્રિયાણિ ચક્ષુ-
રાદીનિ વાગાદીનિ જ્ઞાનકર્માત્મકાનિ ચ યાશ્ચાન્યાઃ
પઞ્ચદેવતાઃ પઞ્ચેન્દ્રિયાભિમાનિન્યઃ દિગ્વાતાદયઃ,
તદુક્તમ્—
દિગ્વાતાદર્કપ્રવેતાશ્વિવહ્નિપ્રાપ્યપ્રલીયકાઃ ઇતિ, તા
દેવતાઃ, એતે સર્વભૂતાદયઃ મનસા અન્તરિન્દ્રિયેણ નિત્યમેવ
સર્વદા
અભિમાનતઃ મમતાહઙ્કારવિષયત્વેન યાવત્તત્ત્વં ન વિન્દતિ

અપરોક્ષબ્રહ્માનુભવં ન પ્રાપ્નોતિ, તાવજ્જીવેન સહ
જીવોપાધિના
લિઙ્ગેન સહ ગચ્છન્તિ ગતાગતં પ્રાપ્નુવન્તીત્યર્થઃ ॥

એવં સ્થૂલદેહલયેઽપિ ધર્માધર્મૌ
લિઙ્ગશરીરમાશ્રિત્ય તિષ્ઠત ઇત્યુક્તે, લિઙ્ગશરીરભઙ્ગઃ
કદેતિ
પૃચ્છતિ—

અર્જુન ઉવાચ—

સ્થાવરં જઙ્ગમં ચૈવ યત્કિંચિત્સચરાચરમ્ ।
જીવા જીવેન સિધ્યન્તિ સ જીવઃ કેન સિધ્યતિ ॥ ૪૭॥

સ્થાવરજઙ્ગમાત્મકં સચરાચરં ચરાચરસહિતં
જગજ્જાલં સર્વસ્મિન્ યે જીવાઃ અભિમાનવન્તઃ
સ્થૂલદેહાભિમાનિનો
વિશ્વાત્મકા જીવાઃ જીવેન લિઙ્ગશરીરાભિમાનિના તૈજસેન
સિધ્યન્તિ વિશ્વાભિમાનં ત્યજન્તિ । સ જીવઃ તૈજસાભિમાની કેન
હેતુના સિધ્યતિ સ્વાભિમાનં ત્યજતીતિ પ્રશ્નાર્થઃ ॥

એવં પૃષ્ટે સતિ પ્રાજ્ઞેન તૈજસઃ સિધ્યતિ,
પ્રાજ્ઞસ્તુરીયે-
ણેત્યેવં ક્રમેણ સિધ્યતીત્યુત્તરમાહ—

શ્રીભગવાનુવાચ—

મુખનાસિકયોર્મધ્યે પ્રાણઃ સંચરતે સદા ।
આકાશઃ પિબતે પ્રાણં સ જીવઃ કેન જીવતિ ॥ ૪૮॥

મુખનાસિકયોર્મધ્યે મુખનાસિકામધ્યતઃ સદા સર્વદા
યાવદદૃષ્ટં પ્રાણવાયુઃ સંચરતે અજપામન્ત્રાત્મકત્વેન
એકૈકસ્ય દિનસ્ય ષટ્શતાધિકૈકવિંશતિસહસ્રસઙ્ખ્યયા
સંચરતિ, તાવત્પર્યન્તમદૃષ્ટમહિમ્ના લિઙ્ગમપિ વર્તતે ।
યદા તુ યોગમહિમ્ના બ્રહ્મજ્ઞાનાનન્તરં જીવસ્યાદૃષ્ટ-
નિવૃત્તિઃ, તદા આકાશઃ જીવત્વનિમિત્તં પ્રાણં પિબતે, તદા

જીવઃ કેન જીવતિ જીવત્વાપાદકાવિદ્યાનિવૃત્ત્યા
નિરઞ્જનબ્રહ્મ-
ભાવે જાતે જીવત્વમેવ નાસ્તીત્યર્થઃ ॥

નનુ બ્રહ્માણ્ડાદ્યુપાધિવિશિષ્ટસ્ય સર્વગતસ્ય બ્રહ્મણઃ
કથં નિરઞ્જનત્વમિતિ પૃચ્છતિ—

અર્જુન ઉવાચ—

બ્રહ્માણ્ડવ્યાપિતં વ્યોમ વ્યોમ્ના ચાવેષ્ટિતં જગત્ ।
અન્તર્બહિશ્ચ તદ્વ્યોમ કથં દેવો નિરઞ્જનઃ ॥ ૪૯॥

હે ભગવન્ વ્યોમ આકાશં બ્રહ્માણ્ડવ્યાપિતં
બ્રહ્માણ્ડા-
વચ્છિન્નમિત્યર્થઃ । વ્યોમ્ના ચ આકાશેન જગત્ આવેષ્ટિતં
વ્યાપ્તમ્, તસ્માત્કારણાત્ અન્તર્બહિશ્ચ વ્યોમૈવ વર્તતે,
એવં સતિ દેવઃ ઈશ્વરઃ કથં નિરઞ્જનઃ અન્યપ્રકાશનિરપેક્ષઃ
કથમિત્યર્થઃ ॥

આકાશાદિસર્વપ્રપઞ્ચસ્ય કલ્પિતત્વેન સર્વં
સેત્સ્યતીત્યભિપ્રાયેણાહ—

શ્રીભગવાનુવાચ—

આકાશો હ્યવકાશશ્ચ આકાશવ્યાપિતં ચ યત્ ।
આકાશસ્ય ગુણઃ શબ્દો નિઃશબ્દો બ્રહ્મ ઉચ્યતે ॥ ૫૦॥

આકાશઃ મહાકાશઃ અવકાશઃ પરિચ્છિન્નાકાશઃ
ઉભયમપ્યાકાશેન આકાશતન્માત્રભૂતેન શબ્દેન
વ્યાપિતં વ્યાપ્તં તદુપાદનકતયા તદતિરિક્તં ન
ભવતીત્યર્થઃ । તર્હિ ઉપાદાનસ્ય શબ્દસ્ય
અતિરિક્તત્વમસ્ત્વિત્યત આહ—
આકાશસ્ય ગુણઃ શબ્દ ઇતિ, શબ્દઃ તન્માત્રભૂતઃ આકાશસ્ય
મિથ્યા-
ભૂતાકાશસ્ય ગુણઃ પરિણામ્યુપાદાનં યતઃ, અત એવ સ્વયમપિ
મિથ્યાભૂત ઇત્યર્થઃ । બ્રહ્મ તુ નિઃશબ્દઃ નિષ્પ્રપઞ્ચઃ

ઇત્યુચ્યતે । તથા ચ સત્યસ્યાક્ષરસ્ય બ્રહ્મણઃ અસત્યેન સહ સમ્બન્ધાસમ્ભવાત્ નિરઞ્જનત્વમુપપદ્યત ઇત્યર્થઃ ॥

એવં ભગવતોક્તે, અક્ષરશબ્દસ્ય ભગવદભિમતાર્થં અજાનાનઃ સન્ લોકપ્રસિદ્ધવર્ણાત્મકાક્ષરબુદ્ધ્યા વર્ણાનામક્ષરત્વં ન સમ્ભવતીત્યભિપ્રાયેણ પૃચ્છતિ—

અર્જુન ઉવાચ—

દન્તોષ્ઠતાલુજિહ્વાનામાસ્પદં યત્ર દૃશ્યતે ।
અક્ષરત્વં કુતસ્તેષાં ક્ષરત્વં વર્તતે સદા ॥ ૫૧॥

હે ભગવન્ યત્ર વર્ણાત્મકાક્ષરેષુ દન્તોષ્ઠતાલુજિહ્વાનામ્, ઉપલક્ષણેમેતત્ કણ્ઠાદીનામષ્ટાનાં સ્થાનાનામ્, આસ્પદમ્ આસ્પદત્વં દૃશ્યતે પ્રત્યક્ષમનુભૂયતે । ' અકુહવિસર્જનીયાનાં કણ્ઠઃ ' ઇત્યાદિના શ્રૂયતે ચ । તથા ચ તેષાં વર્ણાનામ્ અક્ષરત્વં નાશરહિતત્વં કુતઃ, ઉત્પત્તિમતો નાશાવશ્યંભાવાત્ ? સદા સર્વકાલં ક્ષરત્વં નાશવત્ત્વમેવ વર્તતે તેષામ્, નાશરહિતત્વં કુત ઇતિ પ્રશ્નાર્થઃ ॥

એવમભિપ્રાયમજાનાનેન અર્જુનેન પૃષ્ટે સ્વાભિપ્રેતમક્ષરશબ્દાર્થં સ્ફુટયન્ ભગવાનુવાચ—

શ્રીભગવાનુવાચ—

અઘોષમવ્યઞ્જનમસ્વરં ચા-
પ્યતાલુકણ્ઠોષ્ઠમનાસિકં ચ ।
અરેખજાતં પરમૂષ્મવર્જિતં
તદક્ષરં ન ક્ષરતે કથંચિત્ ॥ ૫૨॥

અઘોષં ઘોષાખ્યવર્ણગુણરહિતમ્ અવ્યઞ્જનં કકારાદિવ્યઞ્જનાતીતમ્ અસ્વરમ્ અજતીતમ્, અતાલુકણ્ઠોષ્ઠમપિ અજ્વ્યઞ્જનાદ્યુત્પત્તિસ્થાનતાલ્વોષ્ઠાદિરહિતં અનાસિકમ્ અનુસ્વારોત્પત્તિસ્થાનનાસિકાતીતમ્ અરેખજાતં વર્ણવ્યઞ્જકરેખાસમૂહાતીતમ્ ઊષ્મવર્જિતં શષસહ-

અતીતમ્, યદ્વા, ઊષ્મશબ્દેન શ્વાસાખ્યો ગુણોઽભિધીયતે
તદ્રહિતમ્, પરં લોકપ્રસિદ્ધવર્ણલક્ષણાતીતં યત્ બ્રહ્મ
કથંચિત્ સર્વપ્રકારેણ સર્વકાલેઽપિ ન ક્ષરતે,
તદેવાક્ષર-
શબ્દેનોચ્યતે । ન લૌકિકાન્યક્ષરાણીત્યર્થઃ ॥

એતાદૃશં બ્રહ્મજ્ઞાનોપાયમ્ અનુભવદાર્ઢ્યાય
પુનરપિ પૃચ્છતિ—

અર્જુન ઉવાચ—

જ્ઞાત્વા સર્વગતં બ્રહ્મ સર્વભૂતાધિવાસિતમ્ ।
ઇન્દ્રિયાણાં નિરોધેન કથં સિધ્યન્તિ યોગિનઃ ॥ ૫૩॥

સર્વભૂતાધિવાસિતં સર્વભૂતેષ્વપ્યન્તર્યામિતયા
સ્થિતં
સર્વગતમ્ અન્તર્બહિશ્ચ પરિપૂર્ણમ્, બ્રહ્મ જ્ઞાત્વા સમ્યગ્-
વિબુધ્ય યોગિનઃ ઇન્દ્રિયાણાં નિરોધેન ઇન્દ્રિયનિયમનેન કથં
સિધ્યન્તિ કેનોપાયેન મુક્તા ભવન્તીત્યર્થઃ ॥

એવં પૃષ્ટો ભગવાન્ તમેવ જ્ઞાનોપાયં પુનરપ્યાહ—

શ્રીભગવાનુવાચ—

ઇન્દ્રિયાણાં નિરોધેન દેહે પશ્યન્તિ માનવાઃ ।
દેહે નષ્ટે કુતો બુદ્ધિર્બુદ્ધિનાશે કુતો જ્ઞતા ॥ ૫૪॥

માનવાઃ મનુષ્યાઃ ઇન્દ્રિયાણાં નિરોધેન ઇન્દ્રિયનિયમનેન
દેહે દેહે એવ પશ્યન્તિ જ્ઞાસ્યન્તિ, તસ્માત્ દેહદાર્ઢ્યં ચ
જ્ઞાનોપાય ઇતિ ભાવઃ । તદભાવે જ્ઞાનમેવ નાસ્તિ ઇત્યાહ—
દેહે નષ્ટે અદૃષ્ટે સતિ બુદ્ધિઃ કુતઃ તત્ત્વજ્ઞાનં કુતઃ ?
તસ્માદ્દેહેન્દ્રિયાદિભિઃ યજ્ઞદાનાદિશ્રવણાદિકમેવ તત્ત્વજ્ઞાને
કારણમિતિ ભાવઃ ॥

તાદૃશં ચ કારણં
યાવત્પર્યન્તમનુષ્ઠેયમિત્યાશઙ્ક્ય
અવધિમાહ—

તાવદેવ નિરોધઃ સ્યાદ્યાવત્તત્ત્વં ન વિન્દતિ ।
વિદિતે તુ પરે તત્ત્વે એકમેવાનુપશ્યતિ ॥ ૫૫॥

યાવત્તત્ત્વજ્ઞાનં નાસ્તિ,
તાવત્પર્યન્તમિન્દ્રિયનિરોધઃ સ્યાત્;
પરે તત્ત્વે અખણ્ડાનન્દબ્રહ્મણિ વિદિતે અપરોક્ષભૂતે સતિ,
એકમેવાનુપશ્યતિ એકમેવ દેહેન્દ્રિયસાધનાનુષ્ઠાનાદિસાધન-
રહિતં બ્રહ્મૈવાનુપશ્યતિ, નાન્યત્; તદનન્તરં સાધના-
નુષ્ઠાનપ્રયાસોઽપિ મા ભૂદિતિ ભાવઃ ॥

તસ્માદ્યાવત્તત્ત્વજ્ઞાં તાવત્સાધનમનુષ્ઠેયમ્,
તદભાવે તન્ન સિધ્યતીત્યાહ—

નવચ્છિદ્રકૃતા દેહાઃ સ્રવન્તિ ગલિકા ઇવ ।
નૈવ બ્રહ્મ ન શુદ્ધં સ્યાત્પુમાન્બ્રહ્મ ન વિન્દતિ ॥ ૫૬॥

દેહાઃ જ્ઞાનકારણીભૂતશરીરાણિ નવચ્છિદ્રકૃતાઃ
વિષયસ્રાવિવૃત્તિમન્નવેન્દ્રિયઘટિતાનિ; તત્ર દૃષ્ટાન્તઃ
ગલિકા ઇવ ચ્છિદ્રઘટા ઇવ સર્વદા જ્ઞાનં સ્રવન્તીત્યર્થઃ ।
તાદૃશવિષયપ્રવણચિત્તસ્ય બ્રહ્મ ન શુદ્ધં સ્યાત્ ઇતિ
નૈવ ઈશ્વરત્વકર્તૃત્વબિમ્બત્વાદિઘટિતં ન ભવતિ । તથા ચ
બ્રહ્મણિ બિમ્બત્વાદિઘટિતે પુમાન્ સુખદુઃખાભિમાની
પ્રતિબિમ્બો જીવઃ બ્રહ્મ ન વિન્દતિ આનન્દાનુભવં ન પ્રાપ્નો-
તીત્યર્થઃ ॥

તસ્માત્ યાવત્તત્ત્વાપરોક્ષપર્યન્તં સાધને યત્નઃ
કર્તવ્યઃ, જાતે ચ તત્ત્વાવબોધે વિધિનિષેધાતીતત્વેન ન કોઽપિ
યત્નઃ કર્તવ્ય ઇત્યભિપ્રાયવાનાહ—

અત્યન્તમલિનો દેહો દેહી ચાત્યન્તનિર્મલઃ ।
ઉભયોરન્તરં જ્ઞાત્વા કસ્ય શૌચં વિધીયતે ॥ ૫૭॥

દેહઃ પાઞ્ચભૌતિકઃ અત્યન્તમલિનઃ જડત્વાદિતિ ભાવઃ ।
દેહી આત્મા નિષ્કૃષ્ટાહઙ્કારઃ સન્ અત્યન્તનિર્મલઃ
અહઙ્કારો-
પાધિકસંસારરહિતઃ ઇત્યેવમુભયોર્દેહાત્મનોઃ અન્તરં કલ્પિતત્વ-

સત્યત્વે જ્ઞાત્વા યો વર્તતે, તં પ્રતિ કસ્ય શૌચં વિધીયતે
દેહસ્ય
વા આત્મનો વા ? દેહસ્ય ચેત્, જડસ્ય જડેન જલાદિના ન
શુદ્ધિઃ; આત્મનશ્ચેત્ પૂર્વમેવ શુદ્ધસ્ય ન શૌચાદિના
પ્રયોજનમિતિ ભાવઃ ॥

ઇતિ શ્રીગૌડપાદાચાર્યવિરચિતાયાં ઉત્તરગીતાવ્યાખ્યાયાં પ્રથમોઽધ્યાયઃ ॥

॥ દ્વિતીયોઽધ્યાયઃ ॥

અરૂઢસ્યારુરુક્ષોશ્ચ સ્વરૂપે પરિકીર્તિતે ।
તત્રારૂઢસ્ય બિમ્બૈક્યં કથં સ્યાદિતિ પૃચ્છતિ ॥

અર્જુન ઉવાચ—

જ્ઞાત્વા સર્વગતં બ્રહ્મ સર્વજ્ઞં પરમેશ્વરમ્ ।
અહં બ્રહ્મેતિ નિર્દેષ્ટું પ્રમાણં તત્ર કિં ભવેત્ ॥ ૧॥

હે ભગવન્ બ્રહ્મ બિમ્બભૂતં ચૈતન્યં સર્વગતં
સર્વત્ર પરિપૂર્ણં સર્વજ્ઞં સર્વસાક્ષિભૂતં પરમેશ્વરં
સર્વનિયામકમિતિ જ્ઞાત્વા તત્ત્વમસીત્યાદિવાક્યતો વિબુધ્ય અહં
બ્રહ્મેતિ, પ્રતિબિમ્બાત્મા જીવઃ બ્રહ્મેતિ નિર્દેષ્ટું વક્તું તત્ર
તસ્મિન્નૈક્યે કિં પ્રમાણં કિમુપપાદકમિત્યર્થઃ ॥

એવં પૃષ્ટો ભગવાન્ ક્ષીરજલાદિદૃષ્ટાન્તેન
ઉપાધિનિવૃત્તાવાત્મૈક્યં સમ્ભવતીત્યાહ—

શ્રીભગવાનુવાચ—

યથા જલં જલે ક્ષિપ્તં ક્ષીરે ક્ષીરં ઘૃતે ઘૃતમ્ ।
અવિશેષો ભવેત્તદ્વજ્જીવાત્મપરમાત્મનોઃ ॥ ૨॥

જલે નદ્યાદૌ જલં તદેવ પાત્રાદુદ્ધૃતં પાત્રોપાધિતઃ
પૃથક્ભૂતં તત્રૈવ ક્ષિપ્તે પાત્રોપાધિનિવૃત્તૌ મહાજલૈક્યં
પ્રાપ્નોતિ, એવં ક્ષીરે ક્ષીરં ઘૃતે ઘૃતં ક્ષિપ્તં સત્
તત્તદૈક્યં પ્રાપ્નોતિ, તદ્વત્ જીવાત્મપરમાત્મનોઃ અવિદ્યા-
દ્યુપાધિતો ભેદેઽપિ તન્નિવૃત્તાવવિશેષઃ સમ્ભવતીતિ ભાવઃ
॥

એવમૈક્યજ્ઞાનં ગુરુમુખાદેવ સમ્ભાવિતમવિદ્યા-
નિવર્તકમ્, ન તુ સ્વતન્ત્રવિચારસમ્ભાવિતમિતિ વદન્
તત્ત્વ-
જ્ઞાનાર્થં ગુરુમેવ અભિગચ્છેદિતિ ગુરૂપાસનામાહ—

જીવે પરેણ તાદાત્મ્યં સર્વગં જ્યોતિરીશ્વરમ્ ।
પ્રમાણલક્ષણૈર્જ્ઞેયં સ્વયમેકાગ્રવેદિના ॥ ૩॥

સ્વયમધિકારી એકાગ્રવેદિના બ્રહ્મનિષ્ઠેન ગુરુણા
પ્રમાણલક્ષણૈઃ ' તત્ત્વમસિ ' ' યતો વા ઇમાનિ
ભૂતાનિ ' ' યઃ સર્વજ્ઞઃ સર્વવિત્ ' ઇત્યાદિભિઃ
જીવે પરેણ
પરમાત્મના તાદાત્મ્યમ્ ઐક્યં બોધિતે સતિ, તદનન્તરં
સ્વયમેવ સર્વગં
સર્વવ્યાપિનમીશ્વરં સર્વનિયન્તારં જ્યોતિઃ સ્વયંપ્રકાશાત્મા
ઇતિ વિજ્ઞેયં જ્ઞાતું યોગ્યમિત્યર્થઃ ॥

એવં ગુરૂપદેશાનન્તરભવિજ્ઞાનેનૈવોપપત્તૌ કિં
કર્મયોગેનેતિ પૃચ્છતિ—

અર્જુન ઉવાચ—

જ્ઞાનાદેવ ભવેજ્જ્ઞેયં વિદિત્વા તત્ક્ષણેન તુ ।
જ્ઞાનમાત્રેણ મુચ્યેત કિં પુનર્યોગધારણા ॥ ૪॥

હે ભગવન્ જ્ઞેયં વિચાર્યં બ્રહ્મૈક્યં જ્ઞાનાદેવ
ગુરૂપદિષ્ટાદેવ ભવેત્; તથા ચ વિદિત્વા
ગુરૂપદેશાનન્તરં
તત્ત્વં જ્ઞાત્વા તત્ક્ષણેન તુ
વેદાન્તવાક્યજન્યચરમવૃત્ત્યુત્તર-
ક્ષણમેવ મુચ્યેત મુક્તો ભવેત્; એવં જ્ઞાનમાત્રેણ
મુક્ત્યુપપત્તૌ
યોગધારણાકર્મયોગાભ્યાસઃ કિં પુનઃ કિં પ્રયોજનમ્ વ્યર્થ-
ત્વાદિત્યભિપ્રાયઃ ॥

એવં કર્મયોગવૈયર્થ્યે શઙ્કિતે યાવત્તત્ત્વજ્ઞાનં ન સમ્ભવતિ, તાવદન્તઃકરણશુદ્ધ્યર્થમનુષ્ઠેયં કર્મ; સિદ્ધે ચ તસ્મિન્ જ્ઞાને, પુનઃ કર્માનુષ્ઠાનં મા ભૂત્ ઇત્યાહ—

શ્રીભગવાનુવાચ—

જ્ઞાનેન દીપિતે દેહે બુદ્ધિર્બ્રહ્મસમન્વિતા ।
બ્રહ્મજ્ઞાનાગ્નિના વિદ્વાન્નિર્દહેત્કર્મબન્ધનમ્ ॥ ૫॥

હે અર્જુન વિદ્વાન્ વિવેકી જ્ઞાનેન દેહે લિઙ્ગશરીરે દીપિતે
શુદ્ધે, તતઃ બુદ્ધિઃ નિશ્ચયાત્મિકા બ્રહ્મસમન્વિતા ચેત્ બ્રહ્મણિ સ્થિતા અસમ્ભાવનારહિતા ચેત્, તદનન્તરં બ્રહ્મજ્ઞાનાગ્નિના
બ્રહ્મજ્ઞાનાનલેન કર્મબન્ધનં કર્મપાશં નિર્દહેત્ ત્યજેદિત્યર્થઃ ।
તદુક્તમ્—' જ્ઞાનાગ્નિઃ સર્વકર્માણિ ભસ્મસાત્કુરુતેઽર્જુન ' ઇતિ ॥

એવં પ્રાપ્તતત્ત્વૈકસ્ય તતઃ પરં કિમપિ ન કાર્યમિત્યાહ—

તતઃ પવિત્રં પરમેશ્વરાખ્ય-
મદ્વૈતરૂપં વિમલામ્બરાભમ્ ।
યથોદકે તોયમનુપ્રવિષ્ટં
તથાત્મરૂપો નિરુપાધિસંસ્થઃ ॥ ૬॥

તતઃ તત્ત્વજ્ઞાનાનન્તરમ્ ઉદકે મહોદકે અનુપ્રવિષ્ટં ઐક્યં ગતં તોયં પરિચ્છિન્નોદકમ્, તદ્વત્ પવિત્રં શુદ્ધં
પરમેશ્વરાખ્યં પરમેશ્વરસઞ્જ્ઞં તથાપિ વિમલામ્બરાભં નિર્મલાકાશવદસઙ્ગમ્ અદ્વૈતરૂપં સજાતીયવિજાતીયસ્વગત-
ભેદરહિતં બ્રહ્મ પરં બ્રહ્મ અનુપ્રવિષ્ટઃ તદૈક્યં ગતઃ અત

એવ પરમાત્મરૂપઃ સન્ નિરુપાધિસંસ્થો ભવેત્ ઔપાધિક-
કર્તૃત્વાદિભેદરહિતો ભવેત્, સ્વયં નિષ્ક્રિય
આસીતેત્યર્થઃ;
ગુણા ગુણેષુ વર્તન્તે ઇતિ ન્યાયાદિતિ ભાવઃ ॥

એવં યથોક્તકર્માનુષ્ઠાનદ્વારા તત્ત્વજ્ઞાને જાત એવ
પરમાત્મતત્ત્વં જ્ઞાતું શક્યમ્, ન તતઃ પૂર્વેત્યાહ—

આકાશવત્સૂક્ષ્મશરીર આત્મા
ન દૃશ્યતે વાયુવદન્તરાત્મા ।
સ બાહ્યમભ્યન્તરનિશ્ચલાત્મા
જ્ઞાનોલ્કયા પશ્યતિ ચાન્તરાત્મા ॥ ૭॥

આકાશવત્ સૂક્ષ્મશરીરઃ આકાશં યથાતીન્દ્રિયં,
તદ્વત્ પરમાત્મા સૂક્ષ્મશરીરઃ, સૂક્ષ્મત્વમત્ર
અતીન્દ્રિયત્વ-
મભિપ્રેતમ્, તાદૃશઃ પરમાત્મા વાયુવત્ વાયુર્યથા
ચક્ષુરાદિવિષયો ન, તદ્વત્ અન્તરાત્મા જીવોઽપિ ન
દૃશ્યતે,
તત્સ્વરૂપમપીન્દ્રિયવિષયં ન ભવતીત્યર્થઃ,
મનસોઽપ્રમાણત્વસાધનાદિતિ ભાવઃ । તર્હિ તયોઃ
અપરોક્ષતત્ત્વજ્ઞાનં
કેનેત્યત આહ—સ બાહ્યમભ્યન્તરનિશ્ચલાત્મ
વિષયવિક્ષિપ્તચિત્તો
ન ભવતિ, સઃ જ્ઞાનોલ્કયા
વેદાન્તજન્યતત્ત્વાપરોક્ષવૃત્તિરૂપજ્ઞાનદીપેન
અન્તરાત્મા અન્તર્મુખચિત્તઃ પશ્યતિ તદુભયૈક્યં
જાનાતીત્યર્થઃ ॥

ઇહ કેષાંચિદ્દર્શનં અર્ચિરાદિમાર્ગેણ લોકાન્તરપ્રાપ્તિઃ
મુક્તિઃ ઇતિ, તન્નિરાકર્તુમ્ ' અત્ર બ્રહ્મ સમશ્નુતે '
ઇત્યાદિ
શ્રુત્યા પૂર્વોક્તજ્ઞાનિનો મુક્તિસ્વરૂપમાહ—

યત્ર યત્ર મૃતો જ્ઞાની યેન કેનાપિ મૃત્યુના ।
યથા સર્વગતં વ્યોમ તત્ર તત્ર લયં ગતઃ ॥ ૮॥

સર્વગતં સર્વવસ્ત્વવચ્છિન્નં વ્યોમ આકાશં યથા
અવચ્છેદકવસ્તુનાશે તત્રૈવ મહાવ્યોમ્નિ લયમ્ ઐક્યં
પ્રાપ્નોતિ, તથા સર્વગતઃ જ્ઞાની સર્વત્ર
પરિપૂર્ણબ્રહ્માભિન્નઃ
શરીરાદ્યુપાધિના ભિન્નત્વેન વ્યવહ્રિયમાણઃ બ્રહ્માપરોક્ષ-
જ્ઞાની યેન કેન મૃત્યુના યત્ર કુત્રાપિ વા મૃતઃ
અજ્ઞાનોપાદાનક-
દેહં જ્ઞાનેન નાશયતિ, તત્ર તત્રૈવ બ્રહ્મણિ લયમ્ ઐક્યં
ગતઃ
પ્રાપ્ત એવેત્યર્થઃ । અનેન તત્ત્વજ્ઞાનિનો દેશકાલાદ્યપેક્ષા
મરણે
મા ભૂદિતિ સૂચિતમ્ । ભૃગ્વગ્ન્યાદ્યપમૃત્યુનિમિત્તક-
પ્રાયશ્ચિત્તાન્યપિ આરુરુક્ષ્વધિકૃતાનિ ઇતિ વેદિતવ્યમ્ ॥

એકસ્યાપિ જીવસ્ય દેહાદ્યવચ્છેદકભેદેન નાનાત્વં
જીવ-
સ્યાણુત્વપક્ષે ન સમ્ભવતીત્યાશઙ્ક્ય જીવસ્ય વ્યાપિત્વં
સાધયતિ —

શરીરવ્યાપિતં વ્યોમ ભુવનાનિ ચતુર્દશ ।
નિશ્ચલો નિર્મલો દેહી સર્વવ્યાપી નિરઞ્જનઃ ॥ ૯॥

શરીરવ્યાપિતં શરીરાદિસર્વદ્રવ્યવ્યાપિતં વ્યોમં
આકાશં
યથા ભુવનાનિ ચતુર્દશ ભૂર્ભુવરાદીનિ વ્યાપિતં સત્
વર્તતે,
એવં નિશ્ચલઃ ક્રિયારહિતઃ નિર્મલઃ પરિશુદ્ધઃ નિરઞ્જનઃ
સ્વયં-
પ્રકાશો દેહી જીવઃ સર્વવ્યાપી જગદ્વ્યાપીત્યર્થઃ ।
જગન્માત્રસ્ય
અવિદ્યાપરિણામત્વેન જગદુપાદાનાવિદ્યાપ્રતિબિમ્બસ્યૈવ જીવત્વેન

તસ્ય વ્યાપિત્વમેવ નાણુત્વમિતિ ભાવઃ ॥

એવં તત્ત્વજ્ઞાનિનો મુક્તિસ્વરૂપમભિધાય તતઃ પરં
તત્ત્વ-
જ્ઞાનસાધનાનુષ્ઠાતુઃ તદેવ સર્વપાપપ્રાયશ્ચિત્તમિત્યાહ—

મુહૂર્તમપિ યો ગચ્છેન્નાસાગ્રે મનસા સહ ।
સર્વં તરતિ પાપ્માનં તસ્ય જન્મ શતાર્જિતમ્ ॥ ૧૦॥

યઃ જ્ઞાનસાધનાનુષ્ઠાતા મનસા સહ સાધનેન સહ
મુહૂર્તમાત્રમપિ નાસાગ્રે ગચ્છેત્ નાસાગ્રે તત્ત્વજ્ઞાનાર્થં
નિશ્ચલં ચક્ષુઃ કુર્યાત્, તસ્ય તાદૃશહંસમુદ્રાનિષ્ઠસ્ય
જન્મશતાર્જિતં અનેકજન્મસંચિતં સર્વં યત્પાપમસ્તિ તત્સર્વં
પાપ્માનં પાપં યોગી તરતિ નાશયતીત્યર્થઃ । તદુક્તં
' યસ્ય
બ્રહ્મવિચારણં ક્ષણમપિ પ્રાપ્નોતિ ધૈર્યં મનઃ ' '
કુલં
પવિત્રં જનની કૃતાર્થા વિશ્વમ્ભરા પુણ્યવતી ચ તેન
' ઇત્યાદિ—

મુક્તિઃ દ્વિવિધા—સદ્યો મુક્તિઃ ક્રમમુક્તિરિતિ, તત્ર
સદ્યો મુક્તિઃ
' યત્ર યત્ર મૃતો યોગી ' ઇત્યાદિના, ' અત્ર બ્રહ્મ
સમશ્નુતે '
ઇત્યાદિ શ્રુત્યા ચ, પ્રતિપાદિતા । ' બ્રહ્મણા સહ તે
સર્વે સમ્પ્રાપ્તે
પ્રતિસંચરે । પરસ્યાન્તે કૃતાત્માનઃ પ્રવિશન્તિ પરં
પરમ્ '
ઇત્યાદિભિઃ પ્રતિપાદિતાં ક્રમમુક્તિં નિરૂપયિતુમ્,
અર્ચિરાદિમાર્ગં ગન્તુઃ
પુનરાવૃત્તિરાહિત્યમ્, ધૂમાદિમાર્ગં ગન્તુઃ પુનરાવૃત્તિં
ચ, નિરૂપયિતું યોગધારણયા તદુભયમાર્ગસ્વરૂપમાહ—

દક્ષિણે પિઙ્ગલા નાડી વહ્નિમણ્ડલગોચરા ।

દેવયાનમિતિ જ્ઞેયા પુણ્યકર્માનુસારિણી ॥ ૧૧॥

દક્ષિણે દેહસ્ય દક્ષિણે ભાગે વહ્નિમણ્ડલગોચરા વહ્નિ-
મણ્ડલં સમ્પ્રાપ્તા પુણ્યકર્માનુસારિણી પુણ્યકર્મભિઃ પ્રાપ્તું
યોગ્યા પિઙ્ગલા નામ નાડી મૂલાધારાદારભ્ય દક્ષિણભાગતઃ
સહસ્રારપર્યન્તં વ્યાપ્તા યા નાડી સા દેવયાનમિતિ જ્ઞેયા
પુનરા-
વૃત્તિરહિતાર્ચિરાદિમાર્ગ ઇતિ જ્ઞેયત્યર્થઃ ॥

ધૂમાદિમાર્ગપ્રાપકેલાનાડીસ્વરૂપમાહ—

ઇલા ચ વામનિશ્વાસસોમમણ્ડલગોચરા ।
પિતૃયાનમિતિ જ્ઞેયં વામમાશ્રિત્ય તિષ્ઠતિ ॥ ૧૨॥

ઇલાનાડી વામનિશ્વાસસોમમણ્ડલગોચરા વામનાસાપુટ-
માર્ગેણ ચન્દ્રમણ્ડલં પ્રાપ્તા વામમાશ્રિત્ય તિષ્ઠતિ,
મૂલા-
ધારાદારભ્ય વામભાગતઃ સહસ્રારપર્યન્તં ગતા યા નાડી
સા પિતૃયાનમિતિ જ્ઞેયા પુનરાવૃત્ત્યનુકૂલધૂમમાર્ગ ઇતિ
જ્ઞેયેત્યર્થઃ ॥

એવમિલાપિઙ્ગલાનાડ્યોઃ સ્થાનં સ્વરૂપં ચ અભિધાય
સુષુમ્નાનાડીસ્વરૂપં નિરૂપયિતું તત્સમ્બન્ધિન્યાઃ બ્રહ્મ-
દણ્ડ્યાઃ સ્વરૂપમાહ—

ગુદસ્ય પૃષ્ઠભાગેઽસ્મિન્વીણાદણ્ડસ્ય દેહભૃત્ ।
દીર્ઘાસ્તિ મૂર્ધ્નિપર્યન્તં બ્રહ્મદણ્ડીતિ કથ્યતે ॥ ૧૩॥

અસ્મિન્ દેહે ગુદસ્ય મૂલાધારસ્ય પૃષ્ઠભાગે
પશ્ચિમ-
ભાગે વીણાદણ્ડસ્ય દેહભૃત્ વીણાયાસ્તન્ત્ર્યાધારભૂતો
યો દણ્ડઃ તદાકારભૃત્ તદ્વત્સ્થિતં મૂર્ધ્નિપર્યન્તં
સહસ્રારપર્યન્તવ્યાપ્તં યદ્દીર્ઘાસ્તિ દીર્ઘં પૃષ્ઠભાગ-
સ્થિતમ્, તત્ બ્રહ્મનાડીતિ કથ્યતે
બ્રહ્મૈક્યપ્રતિપાદકસુષુમ્ના-
ધારત્વાદિતિ ભાવઃ ॥

ઇતઃ પરં સુષુમ્નાનાડીસ્વરૂપમાહ—

તસ્યાન્તે સુષિરં સૂક્ષ્મં બ્રહ્મનાડીતિ સૂરિભિઃ ।

તસ્ય બ્રહ્મદણ્ડ્યાખ્યાસ્થ્નઃ અન્તે અગ્રે સૂક્ષ્મં સુષિરં રન્ધ્રં વર્તત ઇતિ શેષઃ, તદ્ગતા નાડી સૂરિભિઃ વિવેકિભિઃ બ્રહ્મનાડીતિ બ્રહ્મૈક્યપ્રતિપાદિકા નાડીતિ કથ્યત ઇતિ શેષઃ ॥

તામેવ નાડીં નિરૂપયતિ—

ઇલાપિઙ્ગલયોર્મધ્યે સુષુમ્ના સૂક્ષ્મરૂપિણી ।
સર્વં પ્રતિષ્ઠિતં યસ્મિન્સર્વગં સર્વતોમુખમ્ ॥ ૧૪॥

ઇલાપિઙ્ગલનાડ્યોર્મધ્યે સૂક્ષ્મરૂપિણી અતિસૂક્ષ્મબિસ-તન્તુરૂપિણી મૂલાધારાદારભ્ય સ્વાધિષ્ઠાનાદિચક્રદ્વારા સહસ્રારપર્યન્તં ગતા કુણ્ડલિની શક્તિરિતિ પ્રસિદ્ધા યા સુષુમ્ના
નાડી, તસ્યાઃ અગ્રે ઉપરિ સર્વં સર્વાત્મકં વિશ્વતોમુખં સર્વ-
દ્રષ્ટૃ સર્વગં સર્વવ્યાપ્તં યત્તેજઃ બ્રહ્મજ્યોતિઃ, તત્ પ્રતિષ્ઠિતં વિદ્યત ઇત્યર્થઃ, ' તસ્યાઃ શિખાયા મધ્યે
'
ઇતિ શ્રુતેઃ । ' શતં ચૈકા ચ હૃદયસ્ય નાડ્યસ્તાસાં મૂર્ધાનમભિનિઃસૃતૈકા । તયોર્ધ્વમાયન્નમૃતત્વમેતિ—
'
ઇત્યાદિશ્રુતેઃ ।

સુષુમ્નામાર્ગગતસ્ય બ્રહ્મપ્રાપ્તિં નિરૂપયિતું તસ્યાઃ કુણ્ડલિન્યાઃ સકલજગદાત્મકત્વં સકલજગદાધારત્વં સર્વ-દેવાત્મત્વં સર્વવેદાધારકત્વં ચ આહ—

તસ્ય મધ્યગતાઃ સૂર્યસોમાગ્નિપરમેશ્વરાઃ ।
ભૂતલોકા દિશઃ ક્ષેત્રસમુદ્રાઃ પર્વતાઃ શિલાઃ ॥ ૧૫॥

દ્વીપાશ્ચ નિમ્નગા વેદાઃ શાસ્ત્રવિદ્યાકલાક્ષરાઃ ।
સ્વરમન્ત્રપુરાણાનિ ગુણાશ્ચૈતે ચ સર્વશઃ ॥ ૧૬॥

બીજં બીજાત્મકાસ્તેષાં ક્ષેત્રજ્ઞાઃ પ્રાણવાયવઃ ।
સુષુમ્નાન્તર્ગતં વિશ્વં તસ્મિન્સર્વં પ્રતિષ્ઠિતમ્ ॥ ૧૭॥

સૂર્યસોમાગ્નિપરમેશ્વરાઃ સૂર્યમણ્ડલસોમમણ્ડલ-વહ્નિમણ્ડલાનિ તન્મધ્યસ્થિતેશ્વરશ્ચ, ભૂતલોકાઃ પઞ્ચ-મહાભૂતાનિ વ્યોમાદીનિ, ચતુર્દશ ભુવનાનિ ભૂર્ભુવઃ-સુવરાદીનિ, દિશઃ પૂર્વાદયઃ, ક્ષેત્રાણિ વારાણસ્યાદીનિ, સમુદ્રાઃ લવણેક્ષ્વાદયઃ, પર્વતાશ્ચ મેર્વાદયઃ, શિલાઃ યજ્ઞશિલાઃ ચિત્તશિલાદયઃ, દ્વીપાઃ જમ્બ્વાદયઃ, નિમ્નગાઃ જાહ્નવ્યાદયઃ, વેદાઃ ઋગ્વેદાદયઃ, શાસ્ત્રાણિ
મીમાંસાદીનિ,
કલાઃ ચતુઃષષ્ટિકલાઃ, અક્ષરાઃ કકારાદીનિ, સ્વરાઃ
અકારાદયઃ, મન્ત્રાઃ ગાયત્ર્યાદયઃ, પુરાણાનિ
બ્રહ્માણ્ડાદીનિ,
ગુણાઃ સત્ત્વાદયઃ, બીજં પ્રધાનમ્, બીજાત્મકાઃ
મહદાદયઃ,
ક્ષેત્રં જાનન્તીતિ ક્ષેત્રજ્ઞાઃ જીવાઃ, પ્રાણવાયવઃ—
પ્રાણાદયઃ
પઞ્ચનાગાદયઃ પઞ્ચ આહત્ય દશવાયવઃ, સર્વ એતે તસ્ય
સુષુમ્નાનાડીવિશેષસ્ય મધ્યગતાઃ યસ્માત્,
તસ્માત્કારણાત્
સર્વં જગજ્જાતં સુષુમ્નાન્તર્ગતં કુણ્ડલિનીશક્ત્યન્તર્ભૂત-મિત્યર્થઃ । અત એવ તસ્મિન્ સર્વં પ્રતિષ્ઠિતમ્ ઇતિ, '
તસ્યાન્તે
સુષિરઁ સૂક્ષ્મં તસ્મિન્સર્વં પ્રતિષ્ઠિતમ્ ' ઇતિ
શ્રુતેઃ ॥

તસ્માત્સર્વજગદુત્પત્તિકારણમાહ—

નાનાનાડીપ્રસવકં સર્વભૂતાન્તરાત્મનિ ।
ઊર્ધ્વમૂલમધઃ શાખં વાયુમાર્ગેણ સર્વગમ્ ॥ ૧૮॥

सर्वभूतानां सर्वप्राणिनां अन्तरात्मनि देहे नाना-
नाडीप्रसवकं नानानाड्युत्पत्तिस्थानभूतम्, ऊर्ध्वमूलं ऊर्ध्वं ब्रह्म तदेव मूलं उत्पत्तिस्थानं यस्य तत्, अधः-शाखं हिरण्यगर्भादिसृष्टिपरम्पराख्यादधः प्रसृत-तिर्यगादिशाखम्, वायुमार्गेण प्राणापानादिवायुमार्गेण, सर्वगं सर्वव्याप्तं सत् जगदुपादानतया तिष्ठतीत्यर्थः ॥

ब्रह्मोपासनस्थानतया इतरनाड्याधिक्यमाह—

द्विसप्ततिसहस्राणि नाड्यः स्युर्वायुगोचराः ।
कर्ममार्गेण सुषिरास्तिर्यञ्चः सुषिरात्मकाः ॥ १९॥

अधश्चोर्ध्वगतास्तासु नवद्वाराणि शोधयन् ।
वायुना सह जीवोर्ध्वज्ञानी मोक्षमवाप्नुयात् ॥ २०॥

वायुगोचराः वायुसंचारानुकूलाः नाड्यः सिराः द्विसप्ततिसहस्राणि द्व्याधिकसप्ततिसहस्राणि कर्ममार्गेण सुषिराः पुनरावृत्तिप्रापकसुषिरवत्यः; अत एव तिर्यञ्चः तिर्यग्भूताः सुषिरात्मकाः रन्ध्रप्रधानाः अधश्चोर्ध्व-गताः अधोभागमूर्ध्वभागं च गताः सर्वत्र व्याप्ताः; तासु नाडीषु मध्ये सुषुम्नानाड्या नव द्वाराणि शिधयन् प्राणायामेन मुखादिसर्वद्वाराणि शोधयन्; जीवः वायुना सह ऊर्ध्वज्ञानी ब्रह्मापरोक्षज्ञानी सन्
मोक्षमवाप्नुयात्
ब्रह्मैक्यं प्राप्नुयादित्यर्थः । ' तयोर्ध्वमायन्नमृतत्व-मेति ' इत्यादिश्रुतेरिति भावः ॥

तस्याः कुण्डलिन्याः सकलजगदाधारकत्वेन च उपासनां कर्तुमस्यामेव सर्वाणीन्द्रादिपुराणि कल्पयति—

अमरावतीन्द्रलोकोऽस्मिन्नासाग्रे पूर्वतो दिशि ।
अग्निलोको हृदि ज्ञेयश्चक्षुस्तेजोवती पुरी ॥ २१॥

अस्मिन्नाडीविशेषे पूर्वतो दिशि पूर्वस्यां दिशि नासाग्रे नासिकाग्रभागे अमरावती अमरावत्याख्यः इन्द्रलोकः इन्द्रादि-

દેવાવાસભૂતો લોકઃ વર્તત ઇતિ શેષઃ । તથા અનન્તરં ચક્ષુઃ
દક્ષિણં નેત્રં તેજોવતી તેજોવતી નામ પુરીતિ પ્રસિદ્ધ,
હૃદિ હૃદયે
અગ્નિલોકઃ અગ્ન્યાદિદેવાવાસભૂતો લોકઃ જ્ઞેયઃ વર્તત ઇતિ શેષઃ
॥

યામ્યા સંયમની શ્રોત્રે યમલોકઃ પ્રતિષ્ઠિતઃ ।
નૈરૃતો હ્યથ તત્પાર્શ્વે નૈરૃતો લોક આશ્રિતઃ ॥ ૨૨॥

શ્રોત્રે દક્ષિણે કર્ણે યામ્યા યમસમ્બન્ધિની
સંયમિન્યાખ્યો
યમલોકઃ યમાદિદેવવાસભૂતો લોકઃ પ્રતિષ્ઠિતઃ અસ્તીત્યર્થઃ ।
અથ તત્પાર્શ્વે દક્ષિણકર્ણભાગે નૈરૃતઃ નિરૃતિસમ્બન્ધો
નૈરૃત્યાખ્યો લોકઃ આશ્રિતઃ અસ્તીત્યર્થઃ ॥

કિંચ—

વિભાવરી પ્રતીચ્યાં તુ પૃષ્ઠે વારુણિકા પુરી ।
વાયોર્ગન્ધવતી કર્ણપાર્શ્વે લોકઃ પ્રતિષ્ઠિતઃ ॥ ૨૩॥

પ્રતીચ્યાં પશ્ચિમદિશિ પૃષ્ઠે પશ્ચિમભાગે
વિબાવરી-
સંજ્ઞકા વારુણિકા પુરી વરુણસમ્બન્ધિની પુરી વર્તત ઇતિ
શેષઃ;
કર્ણપાર્શ્વે વામકર્ણસમીપે ગન્ધવતી ગન્ધ્વતીપુર્યાખ્યા
વાયોર્લોકઃ પ્રતિષ્ઠિતઃ અસ્તીત્યર્થઃ ॥

કિંચ—

સૌમ્યા પુષ્પવતી સૌમ્યે સોમલોકસ્તુ કણ્ઠતઃ ।
વામકર્ણે તુ વિજ્ઞેયો દેહમાશ્રિત્ય તિષ્ઠતિ ॥ ૨૪॥

સૌમ્યે ઉત્તરદિશિ કણ્ઠતઃ કણ્ઠદેશાદારભ્ય વામકર્ણે
વામશ્રોત્રે સૌમ્યા કુબેરસમ્બન્ધિની પુષ્પવતી પુષ્પવત્યાખ્યા
સોમલોકઃ એવં દેહમાશ્રિત્ય તિષ્ઠતીતિ વિજ્ઞેયઃ ॥

કિંચ—

વામે ચક્ષુષિ ચૈશાની શિવલોકો મનોન્મની ।
મૂર્ધ્નિ બ્રહ્મપુરી જ્ઞેયા બ્રહ્માણ્ડં દેહમાશ્રિતમ્ ॥ ૨૫॥

વામે ચક્ષુષિ વામનેત્રે ઐશાની ઈશાનસમ્બન્ધિની મનોન્મની મનોન્મનીપુર્યાખ્યઃ શિવલોકઃ શિવાવાસભૂતો લોકઃ જ્ઞેયઃ; મૂર્ધ્નિ શિરસિ બ્રહ્મપુરી બ્રહ્મલોકઃ જ્ઞેયઃ; એવં બ્રહ્માણ્ડં સર્વજગજ્જાતં દેહમાશ્રિતં દેહ એવ વર્તત ઇત્યર્થઃ ॥

દેહે એવ લોકાદિકલ્પનામાહ—

પાદાદધઃ શિવોઽનન્તઃ કાલાગ્નિપ્રલયાત્મકઃ ।
અનામયમધશ્ચોર્ધ્વં મધ્યમં તુ બહિઃ શિવમ્ ॥ ૨૬॥

પાદાદધઃ પાદાધઃપ્રદેશે અનન્તઃ મહાશેષઃ વર્તતે, સ તુ કીદૃશઃ ? શિવઃ રુદ્રાત્મકઃ; પુનઃ કીદૃશઃ ? કાલાગ્નિપ્રલયાત્મકઃ પ્રલયકાલાગ્ન્યાત્મક ઇત્યર્થઃ; ’ ત્રિલોક્યાં
દહ્યમાનાયાં સંકર્ષણમુખાગ્નિના ’ ઇતિ સ્મૃતેરિતિ ભાવઃ ।
તદધઃ કિમિત્યાશઙ્ક્યાહ—અધશ્ચોર્ધ્વમિતિ અધોદેશે ઊર્ધ્વ-
દેશે મધ્યદેશે બહિર્દેશે ચ સર્વત્ર અનામયં નિરઞ્જનં શિવં મઙ્ગલાત્મકં બ્રહ્મૈવ વર્તત ઇત્યર્થઃ ॥

શેષોપરિ અતલાદિલોકકલ્પનામાહ—

અધઃ પદોઽતલં વિદ્યાત્પાદં ચ વિતલં વિદુઃ ।
નિતલં પાદસન્ધિશ્ચ સુતલં જઙ્ઘમુચ્યતે ॥ ૨૭॥

મહાતલં તુ જાનુ સ્યાદૂરુદેશો રસાતલમ્ ।
કટિસ્તાલતલં પ્રોક્તં સપ્ત પાતાલસંજ્ઞયા ॥ ૨૮॥

પદઃ પાદસ્યાધોદેશે અતલલોકં વિદ્યાત્; પાદં તુ વિતલં
લોકમિતિ વિદુઃ યોગિન ઇતિ શેષઃ; પાદસન્ધિં તુ ગુલ્ફસ્થાનં

નિતલં વિદ્યાત્; જઙ્ઘં સુતલમિત્યુચ્યતે; જાનુદેશઃ
મહાતલં
સ્યાત્; ઊરુદેશઃ રસાતલં વિદ્યાત્; કટિદેશઃ તલાતલં
પ્રોક્તમ્; એવં દેહાવયવાઃ સપ્ત પાતાલાદિલોકસંજ્ઞયા
કલ્પનીયા ઇત્યર્થઃ ॥

કિંચ—

કાલાગ્નિનરકં ઘોરં મહાપાતાલસંજ્ઞયા ।
પાતાલં નાભ્યધોભાગો ભોગીન્દ્રફણિમણ્ડલમ્ ॥ ૨૯॥

વેષ્ટિતઃ સર્વતોઽનન્તઃ સ બિભ્રજ્જીવસંજ્ઞકઃ ।

ઘોરં ભયંકરં કાલાગ્નિનરકં કાલાગ્નિદેશવત્
કાલાગ્ન્યા-
કારસહ્યનરકદેશવત્ ભોગીન્દ્રફણિમણ્ડલં ભોગીન્દ્રાઃ
સર્પરાજાનઃ ફણયઃ ઇતરે સર્પાઃ તેષાં મણ્ડલં સમૂહવત્
યત્ પાતાલમ્, તત્ નાભ્યધોભાગે નાભ્યધઃપ્રદેશે
મહાપાતાલસંજ્ઞયા અભિહિતમિતિ વિદ્યાત્; સ જીવસંજ્ઞકઃ
જીવસંજ્ઞાવાન્ શેષઃ સર્વતઃ સર્વં વેષ્ટિતઃ સન્
બિભ્રન્સન્
સ્થિતઃ કુણ્ડલાકારેણાવૃત્ય વર્તત ઇત્યર્થઃ ॥

ભૂલોકં નાભિદેશં તુ ભુવર્લોકં તુ કુક્ષિતઃ ॥ ૩૦॥

હૃદયં સ્વર્ગલોકં વિદ્યાત્, તત્ર સૂર્યાદિગ્રહાઃ
નક્ષત્રાણિ ચ તિષ્ઠન્તીત્યર્થઃ । શેષં સ્પષ્ટમ્ ॥

કિંચ—

હૃદયં સ્વર્ગલોકં તુ સૂર્યાદિગ્રહતારકાઃ ।
સૂર્યસોમસુનક્ષત્રં બુધશુક્રકુજાઙ્ગિરાઃ ॥ ૩૧॥

મન્દશ્ચ સપ્તમો હ્યેષ ધ્રુવોઽન્તઃ સ્વર્ગલોકતઃ ।

સૂર્યસોમેત્યાદિ સૂર્યાદિગ્રહનક્ષત્રમિત્યસ્ય
વ્યાખ્યાનમ્ । ધ્રુવોઽન્તઃ સ્વર્ગલોકતઃ સ્વર્ગલોકસ્યાન્તે ધ્રુવો
વર્તત ઇત્યર્થઃ ॥

એવં કલ્પનાફલમાહ

હૃદયે કલ્પયન્યોગી તસ્મિન્સર્વસુખં લભેત્ ॥ ૩૨॥

યોગી હૃદયે એવ સૂર્યાદિગ્રહનક્ષત્રાદીનિ કલ્પયન્
તસ્મિન્
હૃદિ કલ્પનાવિશેષેણ સર્વસુખં લભેત્;
તત્તલ્લોકગતસુખાનિ
પ્રાપ્નોતીત્યર્થઃ ॥

કિંચ—

હૃદયસ્ય મહર્લોકં જનોલોકં તુ કણ્ઠતઃ ।
તપોલોકં ભ્રુવોર્મધ્યે મૂર્ધ્નિ સત્યં પ્રતિષ્ઠિતમ્ ॥ ૩૩॥

હૃદયસ્યોપરીતિ શેષઃ । સ્પષ્ટમન્યત્ ॥

એવં દેહે એવ સર્વલોકકલ્પનામુક્ત્વા તલ્લયપ્રકારમાહ—

બ્રહ્માણ્ડરૂપિણી પૃથ્વી તોયમધ્યે વિલીયતે ।
અગ્નિના પચ્યતે તોયં વાયુના ગ્રસ્યતેઽનલઃ ॥ ૩૪॥

આકાશં તુ પિબેદ્વાયું મનશ્ચાકાશમેવ ચ ।
બુદ્ધ્યહઙ્કારચિત્તં ચ ક્ષેત્રજ્ઞઃ પરમાત્મનિ ॥ ૩૫॥

અત્ર તામસાહઙ્કારકાર્યાણાં પૃથિવ્યાદીનાં
સાત્ત્વિક-
અહઙ્કારકાર્યે મનસિ ક્રમેણ લયકથનં મનોવૃત્તિવિષય-
ત્વાદુપચારાત્ ઇતિ મન્તવ્યમ્ । તચ્ચ મનો બુદ્ધૌ બુદ્ધિ-
રહઙ્કારે અહ્ઙ્કારં ચિત્તે ચિત્તં ક્ષેત્રજ્ઞે ક્ષેત્રજ્ઞઃ
પરમાત્મનિ એવં સર્વાત્મનિ પ્રવિલાપયેદિત્યર્થઃ ॥

એવં યોગાભ્યાસેન બ્રહ્મૈક્યાનુસન્ધાનવતઃ સકલ-
દુરિતનિવૃત્તિરિત્યાહ—

અહં બ્રહ્મેતિ માં ધ્યાયેદેકાગ્રમનસા સકૃત્ ।
સર્વં તરતિ પાપ્માનં કલ્પકોટિશતૈઃ કૃતમ્ ॥ ૩૬॥

સ્પષ્ટોઽર્થઃ ॥

જીવસ્ય મુક્તિસ્વરૂપમાહ—

ઘટસંવૃતમાકાશં નીયમાને ઘટે યથા ।
ઘટો નશ્યતિ નાકાશં તદ્વજ્જીવ ઇહાત્મનિ ॥ ૩૭॥

ઘટે નીયમાને પૂર્વદેશાદન્યદેશં પ્રાપ્યમાને ઘટે નષ્ટે ચ યથા ઘટાકાશં મહાકાશે ઐક્યં પ્રાપ્નોતિ, તદ્વજ્જીવઃ પરમાત્મનીત્યર્થઃ ॥

કિંચ—

ઘટાકાશમિવાત્માનં વિલયં વેત્તિ તત્ત્વતઃ ।
સ ગચ્છતિ નિરાલમ્બં જ્ઞાનાલોક્યં ન સંશયઃ ॥ ૩૮॥

યઃ આત્માનં જીવં ઘટાકાશમિવ પરમાત્મનિ લયં ગતં તત્ત્વતઃ યથાર્થતયા વેત્તિ, સઃ જ્ઞાની નિરાલમ્બં
નિઃસઙ્ગં
જ્ઞાનાલોક્યં બ્રહ્મપ્રકાશાત્મતત્ત્વં ગચ્છતિ પ્રાપ્નોતિ, ન સંશયઃ સન્દેહો નાસ્તિત્યર્થઃ ॥

એતસ્ય જ્ઞાનયોગસ્ય કિમપિ તુલ્યમિત્યાહ—

તપેદ્વર્ષસહસ્રાણિ એકપાદસ્થિતો નરઃ ।
એકસ્ય ધ્યાનયોગસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૩૯॥

આલોડ્ય ચતુરો વેદાન્ધર્મશાસ્ત્રાણિ સર્વદા ।
યો વૈ બ્રહ્મ ન જાનાતિ દર્વી પાકરસં યથા ॥ ૪૦॥

યથા ખરશ્ચન્દનભારવાહી
સારસ્ય વાહી ન તુ ચન્દનસ્ય ।
એવં હિ શાસ્ત્રાણિ બહૂન્યધીત્ય
સારં ત્વજાનન્ખરવદ્વહેત્સઃ ॥ ૪૧॥

ચન્દનભારવાહી શ્રીચન્દનકાષ્ઠભારવાહી ખરઃ ચન્દનસારવાહી ન ભવતિ તદ્ગન્ધાનુભવવાન્ન ભવતિ, એવં બહૂનિ શાસ્ત્રાણ્યધીત્યપિ સારં તુ અજાનન્ બ્રહ્મ ન જાનન્

ખરવત્ શોચ્યઃ આક્રોશ્ય ઇત્યર્થઃ ॥

બ્રહ્મજ્ઞાનપર્યન્તં સર્વમનુષ્ઠેયમ્, જ્ઞાતે તુ
સર્વં
વ્યર્થમિત્યાહ—

અનન્તકર્મ શૌચં ચ જપો યજ્ઞસ્તથૈવ ચ ।
તીર્થયાત્રાદિગમનં યાવત્તત્ત્વં ન વિન્દતિ ॥ ૪૨॥

દેહે ભિન્નેઽપ્યાત્મૈક્યં દૃષ્ટાન્તેનાહ —

ગવામનેકવર્ણાનાં ક્ષીરં સ્યાદેકવર્ણકમ્ ।
ક્ષીરવદ્દૃશ્યતે જ્ઞાનં દેહિનાં ચ ગવાં યથા ॥ ૪૩॥

અનેકવર્ણાનાં શુક્લાદિભિન્નભિન્નવર્ણાનાં ગવાં
ક્ષીરં
યથા એકવર્ણમ્, મીમાંસકમતે ગુણવ્યક્તેરેકત્વાદિતિ ભાવઃ;
તથા ભિન્નભિન્નાનાં દેહિનાં જ્ઞાનં બ્રહ્મ એકં દૃશ્યત
ઇત્યર્થઃ ॥

અહં બ્રહ્મેતિ નિયતં મોક્ષહેતુર્મહાત્મનામ્ ।
દ્વે પદે બન્ધમોક્ષાય ન મમેતિ મમેતિ ચ ॥ ૪૪॥

મમેતિ બધ્યતે જન્તુર્ન મમેતિ વિમુચ્યતે ॥

મમેતિ મમતાવિષયત્વેન સ્વીકૃતં સર્વં બન્ધાય
ભવતિ;
ન મમેતિ મમત્વં વિહાય ત્યક્તં મોક્ષાયૈવેત્યર્થઃ ।
સ્પષ્ટમન્યત્ ॥

અહઙ્કારત્યાગકાર્યમાહ—

મનસો હ્યુન્મનીભાવાદ્દ્વૈતં નૈવોપલભ્યતે ।
યદા યાત્યુન્મનીભાવં તદા તત્પરમં પદમ્ ॥ ૪૫॥

મનસઃ ચિત્તસ્ય ઉન્મનીભાવાત્ અહઙ્કારત્યાગાત્
દ્વૈતં
નૈવોપલભ્યતે, અહઙ્કારોપાધિકત્વાદ્ભેદસ્યેતિ ભાવઃ । તથા

ઉન્મનીભાવં મનો યદા યાતિ નિષ્કૃષ્ટાહઙ્કાર ચૈતન્યં
ભવતિ તદા તદેવ પરમં પદં મોક્ષ ઇત્યભિધીયતે ॥

બ્રહ્મવિચારમકુર્વતઃ સર્વં વ્યર્થમિત્યાહ—

હન્યાન્મુષ્ટિભિરાકાશં ક્ષુધાર્તઃ કણ્ડયેત્તુષમ્ ।
નાહં બ્રહ્મેતિ જાનાતિ તસ્ય મુક્તિર્ન જાયતે ॥ ૪૬॥

યો વેદશાસ્ત્રાણ્યધીત્ય શ્રુત્વાપિ નાહં બ્રહ્મેતિ
જાનાતિ તસ્ય સર્વાણિ શાસ્ત્રણિ પ્રયાસકરાણ્યેવ । યથા
ક્ષુધાર્તઃ
મુષ્ટિભિરાકાશં હન્યાચ્ચેતિ કરભઙ્ગ એવ જાયતે ન કિમપિ
ફલં
યથા વા તુષં કણ્ડયેદવહન્યાત્ । અવહનનશ્રમ એવ ફલં
ન તુ
તણ્ડુલભાવઃ । તદ્વન્મુક્તિર્ન જાયતે ઇતિ ભાવઃ । તદુક્તં
ભાગવતે ’ તેષામસૌ ક્લેશલ એવ શિષ્યતે નાન્યદ્યથા
સ્થૂલતુષા-
વઘાતિનામ્ ’ ઇતિ ॥

ઇતિ શ્રીગૌડપાદાચાર્યવિરચિતાયાં
ઉત્તરગીતાવ્યાખ્યાયાં
દ્વિતીયોઽધ્યાયઃ ॥

॥ તૃતીયોઽધ્યાયઃ ॥

યોગી વ્યર્થક્રિયાલાપપરિત્યાગેન શાન્તધીઃ ।
તૃતીયે શરણં યાયાદ્ધરિમેવેતિ કીર્ત્યતે ॥

શ્રીભગવાનુવાચ—

અનન્તશાસ્ત્રં બહુવેદિતવ્ય-
મલ્પશ્ચ કાલો બહવશ્ચ વિઘ્નાઃ ।
યત્સારભૂતં તદુપાસિતવ્યં
હંસો યથા ક્ષીરમિવામ્બુમિશ્રમ્ ॥ ૧॥

વિવેકિના યોગિના

સારભૂતમધ્યાત્મશાસ્ત્રમેવોપાસિતવ્યં ન
ત્વન્યત્ અશક્યત્વાત્ અનન્તશાસ્ત્રં પર્યવસાનરહિતાનિ
શાસ્ત્રાણીત્યર્થઃ । યથાકથંચિત્પર્યવસાનેઽપિ બહુ
વેદિતવ્યં
તત્તાત્પર્યાણિ બહૂનિ વેદિતવ્યાનીત્યર્થઃ । જ્ઞાતું શક્યત્વેઽપિ
કાલઃ સ્વલ્પ એવ 'પુંસો વર્ષશતં હ્યાયુઃ' ઇતિ
ન્યાયાત્ ।
તસ્માદ્યત્સારભૂતં સર્વશાસ્ત્રાણાલોડ્ય
યન્નિશ્ચિતમખણ્ડૈકરસં
બ્રહ્મ તદેવોપાસિતવ્યમ્ । તદુક્તમ્ ' આલોડ્ય
સર્વશાસ્ત્રાણિ '
ઇત્યાદિ । ઉક્તં ચ હરિવંશે—'
અસત્કીર્તનકાન્તારપરિવર્તનપાંસુભિઃ ।
વાચં હરિકથાલાપગઙ્ગયૈવ પુનીમહે ' ઇતિ । તત્ર
દૃષ્ટાન્તમાહ—હંસો યથા અમ્બુમિશ્રત્વેઽપિ અમ્બ્વંશં
વિહાય
ક્ષીરમેવોપાદત્તે તદ્વદિતિ ભાવઃ ॥

તસ્માત્પાણ્ડિત્યં નિર્વિદ્યેત્યાદિશ્રુત્યા પાણ્ડિત્યપ્રકટનસ્ય બ્રહ્મોપાસનાપ્રતિબન્ધકત્વેન સર્વમપિ પાણ્ડિત્યં હેયમિત્યાહ—

પુરાણં ભારતં વેદશાસ્ત્રાણિ વિવિધાનિ ચ ।
પુત્રદારાદિસંસારો યોગાભ્યાસસ્ય વિઘ્નકૃત્ ॥ ૨॥

યોગાભ્યાસસ્ય આત્મૈક્યયોગાભ્યાસસ્ય । શેષં
સ્પષ્ટમ્ ॥

કિં ચ આત્મવિચારમન્તરેણ ઇતરશાસ્ત્રાણિ ન વિચારયિતવ્યા-
નીત્યાહ—

ઇદં જ્ઞાનમિદં જ્ઞેયં યઃ સર્વં જ્ઞાતુમિચ્છતિ ।
અપિ વર્ષસહસ્રાયુઃ શાસ્ત્રાન્તં નાધિગચ્છતિ ॥ ૩॥

સહસ્રવર્ષપરિમિતાયુષ્માનપિ એકૈકસ્ય શાસ્ત્રસ્ય અન્તં પારં ભાવનિશ્ચયં વા નાધિગચ્છતિ; કિમુત વક્તવ્યં

સર્વાણિ શાસ્ત્રાણિ નાધિગચ્છતીતિ ભાવઃ ॥

તર્હિ સર્વમપિ વિહાય અધિગન્તવ્યં વા
કિમિત્યાશઙ્ક્યાહ—

વિજ્ઞેયોઽક્ષરતન્માત્રં જીવિતં ચાપિ ચઞ્ચલમ્ ।
વિહાય શાસ્ત્રજાલાનિ યત્સત્યં તદુપાસ્યતામ્ ॥ ૪॥

અક્ષરતન્માત્રં નાશરહિતસત્તામાત્રાત્મક આત્મા
વિજ્ઞેયઃ । તત્ર ચ વૈરાગ્યાર્થં જીવિતમપિ ચઞ્ચલમિતિ
વિજ્ઞેયમ્,
' ચરમશ્વાસવેલાયાં યત્કૃત્યં તત્સદા કુરુ ' ઇતિ
ન્યાયાત્ । તસ્માચ્છાસ્ત્રજાલાનિ વિહાય યત્સત્યં
તદેવોપાસ્યતામિતિ ॥

ઇન્દ્રિયજયે વૈરાગ્યં સ્વત એવ જાયત ઇત્યાહ—

પૃથિવ્યાં યાનિ ભૂતાનિ જિહ્વોપસ્થનિમિત્તિકમ્ ।
જિહ્વોપસ્થપરિત્યાગે પૃથિવ્યાં કિં પ્રયોજનમ્ ॥ ૫॥

જિહ્વોપસ્થનિમિત્તિકમ્ આહારવ્યવાયનિમિત્તં સત્
પૃથિવ્યાં
યાનિ ભૂતાનિ સન્તિ, પ્રાયશઃ તત્પરિત્યાગી ચેત્,
પૃથિવ્યાં કિં
પ્રયોજનમ્, કિમપિ પ્રયોજનં નાસ્તીત્યર્થઃ, ' જિતં
સર્વં
જિતે રસે ' ઇતિ ન્યાયાત્ ॥

એવમાત્મસમાધિનિષ્ઠસ્ય સર્વત્ર બ્રહ્મદર્શનમેવ,
નાન્યદર્શનમિત્યાહ—

તીર્થાનિ તોયપૂર્ણાનિ દેવાન્પાષાણમૃન્મયાન્ ।
યોગિનો ન પ્રપદ્યન્તે આત્મધ્યાનપરાયણાઃ ॥ ૬॥

તીર્થસ્નાનાદિના દેવતાપૂજાદિના ચ અધ્યાત્મસમાધૌ
સિદ્ધે પુનસ્તેન કિં પ્રયોજનમિતિ ભાવઃ । સ્પષ્ટમન્યત્ ॥

યોગિનઃ સર્વત્ર બ્રહ્મદર્શનમેવેત્યેતત્ અધિકારિભેદે-

નોપપાદયતિ—

અગ્નિર્દેવો દ્વિજાતીનાં મુનીનાં હૃદિ દૈવતમ્ ।
પ્રતિમા સ્વલ્પબુદ્ધીનાં સર્વત્ર સમદર્શિનામ્ ॥ ૭॥

દ્વિજાતીનાં કર્મકાણ્ડરતાનામ્ અગ્નિર્દૈવતમ્, મુનીનાં મનનશીલાનાં યોગિનાં હૃદિ હૃત્કમલમધ્યસ્થિતા પરિ-ચ્છિન્નમૂર્તિર્દૈવતમ્, સ્વલ્પબુદ્ધીનાં પ્રાકૃતાનાં તુ મૃત્પાષાણાદિપ્રતિમૈવ દૈવતમ્, સમદર્શિનાં તુ આરૂઢાનાં સર્વત્ર ' સર્વં ખલ્વિદં બ્રહ્મ ' ઇતિ શ્રુત્યા સર્વમપિ દૈવતમેવેત્યર્થઃ ॥

તસ્માત્ જ્ઞાનેનૈવ જ્ઞાતવ્યમ્, જ્ઞાનાભાવે બ્રહ્મ ન પશ્યતીત્યાહ—

સર્વત્રાવસ્થિતં શાન્તં ન પ્રપશ્યેજ્જનાર્દનમ્ ।
જ્ઞાનચક્ષુર્વિહીનત્વાદન્ધઃ સૂર્યમિવોદિતમ્ ॥ ૮॥

સર્વત્રાવસ્થિતં સર્વત્ર પરિપૂર્ણમપિ અજ્ઞઃ ન પશ્યતિ; તત્ર હેતુઃ જ્ઞાનચક્ષુર્વિહીનત્વાત્ જ્ઞાનાખ્યચક્ષૂરહિતત્વાત્, તત્ર દૃષ્ટાન્તમાહ—અન્ધ ઇતિ । સ્પષ્ટમન્યત્ ॥

સર્વં બ્રહ્મેત્યેત્તદુપપાદયતિ—

યત્ર યત્ર મનો યાતિ તત્ર તત્ર પરં પદમ્ ।
તત્ર તત્ર પરં બ્રહ્મ સર્વત્ર સમવસ્થિતમ્ ॥ ૯॥

યત્ર યત્ર મનો યાતિ મનો યદ્યદ્વિષયીકરોતિ તત્ર તત્ર પરં સર્વોત્કૃષ્ટં પદં પ્રાપ્ય સ્થાનં પરં બ્રહ્મૈવ સમવસ્થિતમ્ ।

ઘટઃ સ્ફુરતીત્યાદિસ્ફુરણાનુભવાદિતિ ભાવઃ ॥

એતાદૃશસ્ય યોગિનઃ સર્વમપિ પ્રત્યક્ષતયા ભાસત ઇત્યાહ—

દૃશ્યન્તે દૃશિ રૂપાણિ ગગનં ભાતિ નિર્મલમ્ ।
અહમિત્યક્ષરં બ્રહ્મ પરમં વિષ્ણુમવ્યયમ્ ॥ ૧૦॥

પરમં સર્વોત્કૃષ્ટમક્ષરમપક્ષયરહિતમવ્યયં નાશરહિતં વિષ્ણું પરમાત્માનમહમિત્યભેદેનૈવ યો ભાવયતિ તસ્ય ભાવયિતુઃ દૃશિ જ્ઞાને રૂપાણિ દૃશ્યન્તે નામરૂપાત્મકાનિ જગન્તિ ભાસન્ત ઇત્યર્થઃ । ગગનમપિ નિર્મલં ભાસતે; તથા ચ સર્વમપિ પ્રત્યક્ષેણાનુભવતીત્યર્થઃ । ઇયં ચારુરુક્ષાવસ્થાયામન્તરાપતિતા યોગસિદ્ધિરિતિ તત્ત્વજ્ઞા વર્ણયન્તિ । આરૂઢસ્ય બ્રહ્મનિષ્ઠત્વેનૈતદ્દર્શનાયોગાત્ । ’ યા નિશા સર્વભૂતાનામ્ ’ ઇતિ સ્મૃતેઃ ।

દૃશ્યતે ચેત્ખગાકારં ખગાકારં વિચિન્તયેત્ ।
સકલં નિષ્કલં સૂક્ષ્મં મોક્ષદ્વારેણ નિર્ગતમ્ ॥ ૧૧॥

અપવર્ગસ્ય નિર્વાણં પરમં વિષ્ણુમવ્યયમ્ ।
સર્વજ્યોતિર્નિરાકારં સર્વભૂતગુણાન્વિતમ્ ॥ ૧૨॥

સર્વત્ર પરમાત્માનં અહમાત્મા પરમવ્યયમ્ ।

ખગાકારં હંસાત્મકં પરં બ્રહ્મ ’ હંસો વિધિઃ શઙ્કર એવ હંસઃ હંસશ્ચ વિષ્ણુર્ગુરુરેવ હંસઃ ’ ઇત્યાદિ સ્મૃતેઃ દૃશ્યતે ચેદ્યદિ પ્રકાશેત તર્હિ સ્વયં બ્રહ્માત્મા પરબ્રહ્માત્મકઃ સન્ સકલં તેજોમયં નિષ્કલં કલાતીતં સૂક્ષ્મં પ્રમાણાગમ્યં મોક્ષદ્વારેણ નિર્ગતં મોક્ષમાર્ગૈકગમ્યમ્ ॥

અપવર્ગસ્ય નિર્વાણં મોક્ષસુખાત્મકં પરમં

ઉત્કૃષ્ટં વિષ્ણું વ્યાપકમ્ અવ્યયં નાશરહિતં
સર્વતોજ્યોતિરાકાશં
સર્વતઃ સ્વયંપ્રકાશં સર્વભૂતાધિવાસિનં સર્વાન્તર્નિયામકં

પરમાત્માનં ખગાકારં હંસાત્મકં વિચિન્તયેત્
ધ્યાયેદિત્યર્થઃ ॥

એવં ચિન્તયતઃ પાપલેશોઽપિ નાસ્તીત્યાહ—

અહં બ્રહ્મેતિ યઃ સર્વં વિજાનાતિ નરઃ સદા ।
હન્યાત્સ્વયમિમાન્કામાન્સર્વાશી સર્વવિક્રયી ॥ ૧૩॥

સર્વં નિષિદ્ધં કૃત્વાપિ કર્મભિર્ન સ બધ્યતે ઇતિ,
યઃ
સદા સર્વં બ્રહ્મેતિ વિજાનાતિ, સર્વાશ્યપિ
સર્વનિષિદ્ધભક્ષ્યપિ
સર્વવિક્રયી સર્વનિષિદ્ધવિક્રય્યપિ ઇમાન્ કામાન્
અરિષડ્વર્ગાન્
હન્યાત્ જયેત્, સર્વનિષિદ્ધકર્મ કૃત્વાપિ
તૈર્નિષિદ્ધકર્મભિર્ન
બધ્યતે ॥

ક્ષણમાત્રં વા બ્રહ્મધ્યાનરતસ્ય
નાન્યસુખચિન્તેત્યાહ—

નિમિષં નિમિષાર્ધં વા શીતાશીતનિવારણમ્ ।
અચલા કેશવે ભક્તિર્વિભવૈઃ કિં પ્રયોજનમ્ ॥ ૧૪॥

શીતાશીતનિવારણં યથા તથા
શીતોષ્ણસુખદુઃખાદિ-
દ્વન્દ્વસહિષ્ણુતયા નિમિષં નિમિષાર્ધં વા કેશવે ભક્તિ-
રચલા ચેત્, વિભવૈઃ ભક્ત્યતિરિક્તવિષયસુખૈઃ કિં
પ્રયોજનમિતિ ॥

એતાદૃશો યોગી યદિ મોક્ષમાપેક્ષેત, તર્હિ
નાન્યવિષય-
ચિન્તાં કુર્યાદિત્યાહ—

ભિક્ષાન્નં દેહરક્ષાર્થં વસ્ત્રં શીતનિવારણમ્ ।
અશ્માનં ચ હિરણ્યં ચ શાકં શાલ્યોદનં તથા ॥ ૧૫॥

સમાનં ચિન્તયેદ્યોગી યદિ ચિન્ત્યમપેક્ષતે ।

યોગી ચિન્ત્યં મોક્ષં યદિ અપેક્ષેત, તર્હિ
દેહરક્ષણાર્થમેવ
ભિક્ષાન્ન ચિન્તયેત્, ન ત્વિન્દ્રિયપ્રીત્યર્થમિત્યર્થઃ;
વસ્ત્રં ચ
શીતનિવારણાર્થં ચિન્તયેત્, ન અલંકારાય; અશ્માનં
પાષાણં
હિરણ્યં સુવર્ણં ચ શાકં શાલ્યોદનં ચ હેયોપાદેયવૈષમ્ય-
રાહિત્યેન ચિન્તયેદિત્યર્થઃ ॥

કિં ચ—

ભૂતવસ્તુન્યશોચિત્વં પુનર્જન્મ ન વિદ્યતે ॥ ૧૬॥

ભૂતવસ્તુનિ ગતવસ્તુનિ અશોચિત્વે ગતમિતિ દુઃખરાહિત્યે
સિદ્ધે, ઉપલક્ષણમેતત્, આગામિવસ્તુનિરપેક્ષત્વે સિદ્ધે,
વર્તમાનવસ્તુનિ લબ્ધે હર્ષરાહિત્યે સિદ્ધે ચ પુનર્જન્મ ન
વિદ્યતે ॥

આત્મયોગમવોચદ્યો ભક્તિયોગશિરોમણિમ્ ।
તં વન્દે પરમાનન્દં નન્દનન્દનમીશ્વરમ્ ॥

ઇતિ શ્રીગૌડપાદાચાર્યવિરચિતાયાં ઉત્તરગીતાવ્યાખ્યાયાં તૃતીયોઽધ્યાયઃ ॥

Encoded by Sunder Hattangadi sunderh at hotmail.com
Proofread by Sunder Hattangadi, Domenico Salvati salvati-domenico@alice.it

.. Uttara Gita Bhashya ..
Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*